# Critical Edition of the *Īśvarasiddhi* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*

Kei KATAOKA

## Introduction

Bhaṭṭa Jayanta, the ninth century Kashmirian scholar contemporary with King Śaṅkaravarman (reg. A.D. 883-902), attempts to prove the existence of God (*īśvara*) in his *Nyāyamañjarī*. As he states himself (Mysore ed., I 30.8-9: *asmābhis tu lakṣaṇasūtrāṇy eva vyākhyāsyante*), the *Nyāyamañjarī* deals exclusively with the 'definition-sūtras' (*lakṣaṇasūtra*) of the *Nyāyasūtras*. Commenting on *Nyāyasūtra* 1.1.7 (*āptopadeśaḥ śabdaḥ*), which defines verbal testimony as a teaching by a reliable person, he discusses relevant topics in detail. As a consequence, many arguments, including those which were originally less tightly connected with the discussion of verbal testimony, are included in the four chapters (3-6 *āhnikas*) headed by this single sūtra. The proof of God (*īśvarasiddhi*) is one of these topics.

Jayanta himself, however, regards the proof of God as inherent in this sūtra. First, without resorting to the Vedas that he composed, God is *logically* proved to be the agent responsible for designing the world.(1) He must have unique characteristics (*viśeṣa*) such as omniscience (see section 3.9). God, who is independently proved to exist in this way, is then identified as the author of the Vedic scripture. For he is the only candidate available who is able to reveal to us imperceptible dharmas. Otherwise one would have to unnecessarily postulate another omniscient being.(2) Because God is the best 'reliable person' (*āpta*), there can be no doubt about the authoritativeness of his scripture. In this way, the ultimate goal of the science of logic (*nyāyaśāstra*) — 'proving the authoritativeness of

the Veda' (*vedaprāmāṇyasiddhi*) — is achieved in the most reliable way.[3]

Jayanta's unique interpretation is based on his integration of this strategy into this particular sūtra. He introduces this interpretation by presenting the last of his three different explanations of the term *āpta* as follows:[4]

> Or because the [Nyāya] teaching is in order to establish the Vedas' authoritativeness, this definition [can be interpreted] literally as referring to God, i.e. the reliable author of those [Vedas]. He is one who has perceived [and therefore reached] dharma directly [i.e. fulfils the definition of an *āpta*], because dharma is an object of God's perception.

By interpreting the sūtra in this way, Vedic scripture comes to be defined as the teaching of the archetypical 'reliable one' (*āpta*), i.e. God. This reinterpretation is strongly motivated by his unique view of regarding the science of logic as functioning as a 'protection of the Veda' (*vedarakṣā*) against heretics such as the Buddhists. The crucial part of the entire science of logic (*nyāya/ānvīkṣikī*) can be summed up in the following inference: The Veda is authoritative, because it is composed by a reliable authority, i.e. God.

As is clear from the synopsis of this section (see below), Jayanta first introduces opponents' views (section 2) and then establishes his own (section 3). As might have been expected, the most serious opponent for Jayanta is once more Kumārila, the seventh century Mīmāṃsā scholar famous for his *Ślokavārttika*.

While delineating the views of his opponents, Jayanta rearranges the contextual structure of their arguments into a systematic order. The opponents in the present section of the *Nyāyamañjarī* reject every positive evidence (*pramāṇa*) of God in accordance with the Mīmāṃsā theory of *pramāṇa*, i.e. means of valid cognition. God cannot be witnessed through

perception (*pratyakṣa*: section 2.1), inference (*anumāna*: section 2.2), comparison (*upamāna*: section 2.3), verbal testimony (*śabda*: section 2.4), nor logical consequence (*arthāpatti*: section 2.5); therefore God is concluded to be non-existent because of this non-existence of any evidence (*abhāva*: section 2.6).

As one can easily see from the unbalanced weight given to inference (section 2 consists of subsections 2.1-2.8) in the whole contextual structure, the proof of God through inference is the main target of the opponents' critique. For the Naiyāyikas themselves prove God through inference, in particular on the grounds that the earth etc. are results (*kārya*), or that mountains and the like have particular structures (*sanniveśa*). It is in this section that Jayanta incorporates the greater part of Kumārila's arguments as well as some of Dharmakīrti's. Because of this the presentation of the opponents' views as a whole shows an uneven makeup. This peculiarity is all the more noticeable when one takes into consideration the original place of Kumārila's discussion of God, which in fact can be found in the *saṃbandhākṣepaparihāra* section of the *Ślokavārttika*, i.e. in the discussion of the innate relationship between words and word-meanings. One can see that both Kumārila and Jayanta have difficulty in incorporating arguments concerning God in their texts.

In editing this section, I made a particular effort to trace relevant passages of the *saṃbandhākṣepaparihāra* section of Kumārila's *Ślokavārttika*.(5) I also have identified parallel expressions in Jayanta's works, i.e. not only the *Nyāyamañjarī* but also the *Āgamaḍambara*. In the third act of the *Āgamaḍambara*, a Cārvāka named Vṛddhāmbhi queries the existence of God (Dezső's translation, p.153): "But who is this Lord God?" This precipitates a long dialogue between Vṛddhāmbhi and Śrī-Dharmaśiva Bhaṭṭāraka, the head of a Śaiva āśrama (*Āgamaḍambara* 152.18-178.2). But a detailed comparison of Jayanta's treatment of this subject in his two main works is beyond the scope of the present article, though it remains a desideratum for the future.

## Editions and manuscripts consulted and abbreviations

For editing the present section, I have consulted two published editions and four manuscripts.

V — *The Nyāyamañjarī of Jayanta Bhaṭṭa*. 2 parts. Ed. Gaṅgādhara Śāstrī Tailaṅga. Vizianagaram Sanskrit Series, No. 10. Benares: E.J. Lazarus & Co., 1895, 1896. I 190.4-204.12.

M — *Nyāyamañjarī of Jayantabhaṭṭa with Ṭippaṇi — Nyāyasaurabha by the Editor*. Ed. K.S. Varadācārya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983. I 484.2-512.22.

- $M^{ka}$ — Variants reported in M as "ka", a paper manuscript preserved in Oriental Research Institute, Mysore, according to the *prastāvanā* of the first volume.
- $M^{back}$ — Variants of the Allahabad manuscript (=$A_1$) mixed with the editor's own corrections given in the back of the first volume.

$A_1$ — A manuscript preserved in the Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad, No. 833/52. Devanāgarī. Paper. Complete. ff. 146r7-155v1.

$B_1$ — A manuscript preserved in Banaras Hindu University, S. No. 3C/2435, Accn. No. C1015. Kashmirian Devanāgarī. Paper. Incomplete. ff. 52v2-56r20. [I thank Mr. Shinya Moriyama for obtaining on my behalf a copy of this manuscript from the library.]

$K_1$ — A manuscript preserved in the Malayalam Department of the University of Calicut, No. 2602. Malayalam script. Palm leaf. 177 folios. Incomplete. ff. 68v10-75r4. [I thank Dr. Dominic Goodall for kindly making accessible to me his photographs of this manuscript.]

$L_1$ A manuscript preserved in the Akhila Bharatiya Sanskrit Parishad, Lucknow, Serial No. 27E, Access No. 2381. Śāradā script. Paper. 138 folios. Incomplete. ff. 101r11-108v18.

I have not consulted other published editions. For, as I confirmed in Kataoka [2003][2004], they do not have independent value for reconstructing the text. For the conventions in the present edition and other abbreviations, see Kataoka [2003][2004].

Kataoka, Kei

2003 "Critical Edition of the *Vijñānādvaitavāda* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī.*" *The Memoirs of the Institute of Oriental Culture*, 144, 115-155.

2004 "Critical Edition of the *Āgamaprāmāṇya* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī.*" *The Memoirs of the Institute of Oriental Culture*, 146, 131-175.

## Primary texts referred to

See the bibliography in Kataoka [2003][2004]. The following texts are additionally referred to in this edition. For the *Āgamaḍambara* I replace the old edition with a new one.

*Āgamaḍambara: Much Ado About Religion by Bhaṭṭa Jayanta.* Ed. Csaba Dezső. New York University Press and the JJC Foundation, 2005.

*Tantrālokaviveka: Tantrāloka of Abhinavagupta with Commentary by Rājānaka Jayaratha.* Ed. Madhusudan Kaul Shāstrī. Vol. VIII. Srinagar, 1926.

*Padārthadharmasaṅgraha: Word Index to the Praśastapādabhāṣya.* Johannes Bronkhorst & Yves Ramseier. Delhi: Motilal Banarsidass, 1994.

*Pramāṇavārttika. Pramāṇavārttika-kārikā.* Ed. Yūsho Miyasaka. *Acta*

*Indologica* II (Naritasan Shinshoji), 1971-72, 1-206.

*Muṇḍakopaniṣad:* in *The Principal Upaniṣads*. S. Radhakrishnan. London: George Allen & Unwin Ltd., 1953.

*Yogasūtra: Pātañjala-yogasūtra-bhāṣya-vivaraṇam of Śaṅkara-bhagavatpāda.* Ed. Polakam Sri Rama Sastri & S.R. Krishnamurthi Sastri. Madras: Government Oriental Manuscripts Library, 1952.

*Vidhiviveka: Vidhivivekaḥ of Maṇḍanamiśra with Commentary, Nyāyakaṇikā, of Vācaspatimiśra, and Supercommentaries, Juṣadhvaṅkaraṇī and Svaditaṅkaraṇī, of Parameśvaraḥ, Critical and Annotated Edition: the Pūrvapakṣaḥ*. Ed. Elliot M. Stern. 3 parts. Dissertation submitted to the University of Pennsylvania, 1988.

*Ślokavārttika: Ślokavārttika of Śrī Kumārila Bhaṭṭa with the Commentary Nyāyaratnākara of Śrī Pārthasārathi Miśra.* Ed. Dvārikadāsa Śāstrī. Varanasi: Tara Publications, 1978.

*Śvetāśvataropaniṣad*: in *The Principal Upaniṣads*. S. Radhakrishnan. London: George Allen & Unwin Ltd., 1953.

*Harṣacarita: The Harshacarita of Bāṇabhaṭṭa.* Ed. P.V. Kane. Delhi: Motilal Banarsidass, 1986.

## Acknowledgment

First of all I would like to express my sincere gratitude to Dr. Monika Nowakowska for organizing the third International Intensive Sanskrit Summer Retreat in Zakopane in 2004, for which I undertook to prepare the present edition. I also thank Dr. Dominic Goodall, Dr. Csaba Dezső, Dr. Alex Watson, Dr. Peter Bisschop, Mr. Taisei Shida and other friends for suggestions given to me in the reading sessions there. Students of Indian philosophy at the University of Tokyo attended the preparatory session in Tokyo and helped me revise the present edition. I am indebted to the following libraries and institutes for giving me permission to consult manuscripts: Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad;

Central Library of Banaras Hindu University, Varanasi; the Akhila Bharatiya Sanskrit Parishad, Lucknow; the Malayalam Department of the University of Calicut, Calicut. Dr. Alex Watson and Dr. Somadeva Vasudeva kindly checked my English. Last but not least I am much obliged to Prof. Harunaga Isaacson for his comments on my final draft.

1 *Nyāyamañjarī* I 587.4-5: *anumānāt prasiddhe kartari vedavākyais tatpratīter upodbalanam iṣyate, na tv āgamaikaśaraṇa eva kartravagamaḥ.*

2 *Nyāyamañjarī* I 587.8-15: *kiṃ yenaiva kartrā pṛthivyādi kāryaṃ nirmitaṃ tenaiva vaidikyo racanā nirmitā iti cet? om ity ucyate. ... ekenaiva ca siddhe 'rthe dvitīyaṃ kalpayema kim/anekakalpanābījaṃ na hi kiñcana vidyate//*

3 Also cf. *Nyāyamañjarī* 590.8-15: *kartā ya eva jagatām akhilātmavṛttikarmaprapañcaparipākavicitratājñaḥ/ viśvātmanā tadupadeśaparāḥ praṇītās tenaiva vedaracanā iti yuktam etat// āptaṃ tam eva bhagavantam anādim īśam āśritya viśvasiti vedavacaḥsu lokaḥ/ teṣām akartṛkatayā na hi kaścid evaṃ visrambham eti matimān iti varṇitaṃ prāk//*

4 *Nyāyamañjarī* I 401.1-3: *atha vā vedaprāmāṇyasiddhyarthatvāc chāstrasya tatpraṇetur āptasyeśvarasya yathāśrutam evedaṃ lakṣaṇam. sa sākṣātkṛtadharmaiva, dharmasyeśvarapratyakṣagocaratvāt.*

5 In his Japanese translation of a part of the *Īśvarasiddhi* section of the *Nyāyamañjarī* (Mysore ed., I 484.2-502.10), Prof. K. Kano ("Jayanta Bhaṭṭa no Shusaishin-ron." in *Indo no Bunka to Ronri*. Fukuoka: Kyushu Daigaku Shuppan-kai, 2000, 685-716) traced six *Ślokavārttika* verses (*saṃbandhākṣepaparihāra* vv. 77, 81, 68, 69ab, 71, 72), the discussions of which are parallel to those in the *Nyāyamañjarī*.

## Synopsis

1 parameśvarasya vedakartṛtvam

2 īśvarasadbhāve pramāṇābhāvaḥ

  2.1 pratyakṣābhāvaḥ

  2.2 anumānābhāvaḥ

2.2.1 pratyakṣatodṛṣṭam
2.2.2 sāmānyatodṛṣṭam
2.2.2.1 hetor asiddhatā
2.2.2.1.1 kāryatvasyāsiddhatā
2.2.2.1.2 sanniveśasyāsiddhatā
2.2.2.2 hetor anaikāntikatā
2.2.2.3 hetor viśeṣaviruddhatā
2.2.2.4 īśvaraśarīravicāraḥ
2.2.2.5 sṛṣṭiprakāraḥ
2.2.2.6 sṛṣṭiprayojanam
2.2.2.7 īśvarasyākāruṇikatvam
2.2.2.8 karmāpekṣitvam
2.2.2.9 na krīḍārthitvam
2.2.2.10 īśvarasya saṃhartṛtvābhāvaḥ
2.3 upamānābhāvaḥ
2.4 āgamābhāvaḥ
2.5 arthāpattyabhāvaḥ
2.6 īśvarasyābhāvaḥ
2.7 lokaprasiddhinirāsaḥ
2.8 na kadācid anīdṛśaṃ jagat
3 īśvarasādhanānumānam
3.1 na hetor asiddhatā
3.1.1 na kāryatvam asiddham
3.1.1.1 cārvākamatam
3.1.1.2 mīmāṃsakamatam
3.1.1.3 śākyamatam
3.1.1.4 upasaṃhāraḥ
3.1.2 sanniveśaviśiṣṭatvaṃ nāsiddham
3.1.2.1 sanniveśavailakṣaṇyam
3.1.2.2 tatparihāraḥ
3.1.2.3 vastusāmānyam

3.1.2.4 śabdamātrasāmānyanirāsaḥ
3.1.2.5 na sarvātmanā tulyatvam
3.2 na hetor anaikāntikatvam
3.2.1 vanaspatiprabhṛtīnāṃ kartur adṛśyānupalabdhiḥ
3.2.2 adṛśyakartṛkalpanopapattiḥ
3.2.3 na vādīcchayā pakṣe 'ntarbhāvaḥ
3.2.3.1 pakṣanirāsas taduttarañ ca
3.2.3.2 pakṣanirūpaṇam
3.2.3.3 sandigdhavipakṣavṛttitvam
3.2.4 na pṛthivyādibhir vyabhicāraḥ
3.2.4.1 vyāptigrahaṇaprakāraḥ
3.2.4.2 na vastusthityā vipakṣatvam
3.2.4.3 upasaṃhāraḥ
3.3 na hetor viśeṣaviruddhatā
3.4 na hetoḥ kālātyayāpadiṣṭatā
3.5 na hetoḥ satpratipakṣatā
3.6 na hetor aprayojakatā
3.7 upasaṃhāraḥ
3.8 anumānāntaropanyāsaḥ
3.9 viśeṣāvagatiḥ
3.9.1 tatpramāṇam
3.9.1.1 āgamāt
3.9.1.2 kevalavyatirekibalāt
3.9.1.3 pakṣadharmatābalāt
3.9.2 īśvarasya jñānam
3.9.2.1 sarvajñatā
3.9.2.2 jñānasya nityatā
3.9.2.3 jñānasyābhinnatā
3.9.2.4 jñānasya pratyakṣatvam
3.9.3 guṇāntaravattvam
3.9.4 īśvarasyecchāprayatnau

3.9.5 upasaṃhāraḥ
3.10 īśvaraśarīravicāraḥ
3.11 īśvarasyāvyāpāravattvam
3.12 sṛṣṭiprayojanam
3.13 krīḍārthitvam
3.14 īśvarasya kāruṇikatvam
3.15 karmavicāraḥ
3.16 karmādhiṣṭhātā
3.17 sargapralayakalpanopapannā
3.18 karmāvaśyakatā
3.19 aiśvaryahānyabhāvaḥ
3.20 upasaṃhāraḥ

# न्यायमञ्जरी ।
# ईश्वरसिद्धिः

## [1 परमेश्वरस्य वेदकर्तृत्वम्]

ननु च वेदे प्रमाणान्तरसंस्पर्शरहितविचित्रकर्मफलगतसाध्यसाधनभावोपदेशिनि कथं तदर्थसाक्षाद्दर्शी पुरुष उपदेष्टा भवेत् । उच्यते ।

वेदस्य पुरुषः कर्ता न हि यादृशतादृशः ।
किन्तु त्रैलोक्यनिर्माणनिपुणः परमेश्वरः ॥
स देवः परमो ज्ञाता नित्यानन्दः कृपान्वितः ।
क्लेशकर्मविपाकादिपरामर्शविवर्जितः ॥

---

**6** स देवः ··· °वर्जितः ] *Āgamaḍambara* 154.3–6: स हि भगवान् विश्वजगतः स्रष्टा संहर्तानन्तजन्तुग्रामवृत्तेर्विचित्रविपाकस्य कर्मकलापकस्य यथाविषयं विनियोक्ता नित्यानन्दः सर्वज्ञः कृपालुः परमेश्वरः ।
**7** क्लेश° ··· °विवर्जितः ] See section 3.9.5: आह च पतञ्जलिः "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" (*Yogasūtra* 1.24) इति ।

---

**2** ननु च ] $VB_1L_1$ ; ननु चे $A_1$ ; ननु $MK_1$ **2** °रहित° ] $MVB_1L_1$ ; °विरहित° $A_1K_1$ **4** यादृशता° ] $MVA_1B_1K_1$ ; यादृशः ता° $L_1$(unmetrical)

### [2 ईश्वरसद्भावे प्रमाणाभावः]

अत्राह। किं ब्रूषे त्रैलोक्यनिर्माणनिपुण इति। अहो तव सरलमतित्वम्। न हि तथाविधपुरुषसद्भावे किञ्चन प्रमाणमस्ति।

#### [2.1 प्रत्यक्षाभावः]

तथा हीश्वरसद्भावो न प्रत्यक्षप्रमाणकः।
न ह्यसावक्षविज्ञाने रूपादिरिव भासते॥
न च मानसविज्ञानसंवेद्यो ऽयं सुखादिवत्।
योगिनामप्रसिद्धत्वान्न तत्प्रत्यक्षगोचरः॥

#### [2.2 अनुमानाभावः]

##### [2.2.1 प्रत्यक्षतोदृष्टम्]

प्रत्यक्षप्रतिषेधेन तत्पूर्वकमपाकृतम्।
अनुमानम्, अनिर्ज्ञाते तस्मिन् व्याप्त्यनुपग्रहात्॥

---

**2 अहो तव** ] Cf. *Nyāyamañjarī* II 34.17: क्वेदमन्यत्र दृष्टं चेत्, अहो निपुणता तव।
**6 न ह्य॰ ⋯ भासते** ] Cf. *Ślokavārttika saṃbandhākṣepaparihāra*, v. 58ab: स्वरूपेणोपलब्धे ऽपि स्रष्टृत्वं नावगम्यते।
**8 योगिनामप्रसिद्धत्वा॰** ] *Ślokavārttika pratyakṣa*, v. 28cd: न लोकव्यतिरिक्तं हि प्रत्यक्षं योगिनामपि॥ v. 31abc: लोके चाप्यप्रसिद्धत्वात् प्रत्यक्षत्वप्रमाणतः। प्रतिभावत्

---

**2 ॰निपुण इति** ] $VA_1B_1K_1L_1$ ; ॰निपुणमतिरिति M　**2 तव** ] $MVB_1K_1$ (see the *Nyāyamañjarī* passage quoted above) ; om. $A_1$ ; बत $L_1$　**3 ॰सद्भावे** ] $MVB_1K_1L_1$ ; ॰सद्भावि $A_1$　**6 न ह्य॰** ] $MVA_1^{pc}B_1K_1L_1$ ; त्प न ह्य॰ $A_1^{ac}$ (unmetrical)　**6 ॰विज्ञाने** ] $MVA_1B_1L_1$ ; ॰जज्ञाने $K_1$　**7 ॰द्यो ऽयं** ] $MVA_1B_1L_1$ ; ॰द्यायं $K_1$　**12 अनिर्ज्ञाते** ] $MA_1B_1$ ; अनिज्ञाते $K_1$ ; अविज्ञाते $VL_1$

### [2.2.2 सामान्यतोदृष्टम्]

### [2.2.2.1 हेतोरसिद्धता]

### [2.2.2.1.1 कार्यत्वस्यासिद्धता]

न च सामान्यतोदृष्टं लिङ्गमस्यास्ति किञ्चन।
क्षित्यादीनां तु कार्यत्वमसिद्धं सुधियः प्रति॥

### [2.2.2.1.2 सन्निवेशस्यासिद्धता]

शैलादिसन्निवेशोऽपि नैष कर्त्रनुमापकः।
कर्तृपूर्वककुम्भादिसन्निवेशविलक्षणः॥
दृष्टः कर्त्रविनाभावी सन्निवेशो हि यादृशः।
तादृङ्गगादौ नास्तीति कार्यत्ववदसिद्धता॥

### [2.2.2.2 हेतोरनैकान्तिकता]

सिद्धत्वेऽपि न हेतुत्वमनैकान्तात्तृणादिभिः।
अकृष्टजातैः कर्तारमन्तरेणाप्तजन्मभिः॥
तेषामुत्पत्तिसमयप्रत्यक्षत्वेन लक्ष्यते।

---

**7 शैलादिसन्निवेशो ⋯ °नुमापकः** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 74: सन्निवेशविशिष्टानामुत्पत्तिं यो गृहादिवत्। साधयेच्चेतनाधिष्ठां देहानां, तस्य चोत्तरम्॥

**7 शैलादिसन्निवेशो ⋯ °विलक्षणः** ] *Āgamaḍambara* 164.12–1: नन्वन्यदेव कुम्भादि कार्यं संभावितोदयम्। अन्यदेव हि शैलादि, तयोर्हि महदन्तरम्॥

**12 सिद्धत्वे ⋯ तृणादिभिः** ] Cf. *Ślokavārttika saṃbandhākṣepaparihāra*, v. 77ab: अनेकान्तश्च हेतुस्ते तच्छरीरादिना भवेत्।

---

**4 °दृष्टं** ] MVA$_1$B$_1$K$_1^{pc}$L$_1$ ; °दृष्टं दृ K$_1^{ac}$ **5 °कार्यत्वम°** ] MVA$_1$B$_1$L$_1$ ; °कार्यत्वस्य K$_1$ **7 नैष** ] MVB$_1$K$_1$L$_1$ ; नैप A$_1$ **8 °सन्निवेश°** ] MVB$_1$K$_1$L$_1$ ; °सन्निवैश° A$_1$ **12 हेतुत्व°** ] MA$_1$B$_1$K$_1$L$_1$ ; सिद्धत्व° V **12 °नैकान्ता°** ] A$_1$B$_1$K$_1$L$_1$ ; °नैकान्त्या° MV **13 अकृष्ट°** ] MVA$_1$B$_1$L$_1$ ; अदृष्ट° K$_1$ **13 °जातैः** ] MVB$_1$K$_1$L$_1$ ; °जातै A$_1$ **14 °समय°** ] MA$_1$L$_1$ ; °समये V; °समयः B$_1$K$_1$ **14 °त्वेन लक्ष्यते** ] B$_1$K$_1$L$_1$ ; °त्वे न लभ्यते MA$_1$ ; °त्वं न लक्ष्यते V

कर्तुर्दृश्यत्वमित्येवमभावो ऽनुपलब्धितः॥
न च क्षितिजलप्रायदृष्टहेत्वतिरेकिणः।
कस्यापि कल्पनं तेषु युज्यते ऽतिप्रसङ्गतः॥
तेन कर्तुरभावे ऽपि सन्निवेशादिदर्शनात्।
अनैकान्तिकता हेतोर्विप्रत्वे पुरुषत्ववत्॥

[2.2.2.3 हेतोर्विशेषविरुद्धता]

किञ्च व्याप्त्यनुसारेण कल्प्यमानः प्रसिध्यति।
कुलालतुल्यः कर्तेति स्याद्विशेषविरुद्धता॥
व्यापारवानसर्वज्ञः शरीरी क्लेशसंकुलः।
घटस्य यादृशः कर्ता तादृगेव भवेद्भुवः॥
विशेषसाध्यतायां वा साध्यहीनं निदर्शनम्।
कर्तृसामान्यसिद्धौ तु विशेषावगतिः कुतः॥

[2.2.2.4 ईश्वरशरीरविचारः]

अपि च सशरीरो वा जगन्ति रचयेदीश्वरः शरीररहितो वा। श-

---

**7** किञ्च … °विरुद्धता ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 80ab: यथासिद्धे च दृष्टान्ते भवेद्धेतोर्विरुद्धता।
**9** व्यापार° … भवेद्भुवः ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 80cd: अनीश्वरविनाश्यादिकर्तृमत्त्वं प्रसज्यते॥
**11** विशेष° … निदर्शनम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 79: कुम्भकाराद्यधिष्ठानं घटादौ यदि चेष्यते। नेश्वराधिष्ठितत्वं स्याद्, अस्ति चेत्साध्यहीनता॥

---

**1** °मित्येवम° ] $M^{ka}M^{back}A_1B_1K_1L_1$; °मपि एवं M; °मप्येवम° V **1** °लब्धितः ] $MVA_1B_1K_1L_1^{pc}$; °लिब्धितः $L_1^{ac}$ **2** क्षिति° ] $MVA_1B_1L_1$; क्षित° $K_1$ **2** °तिरेकि° ] $MVB_1K_1L_1$; °विरेकि° $A_1$ **5** अनैकान्ति° ] $MVA_1B_1L_1$; अनेकान्ति° $K_1$ **7** व्याप्त्य° ] $MVA_1B_1K_1$; व्याप्त्या° $L_1$ **9** °संकुलः ] $MVA_1B_1K_1$; °सङ्कुशः $L_1$ **11** °यां वा ] $MVA_1B_1L_1$; °याञ्च $K_1$ **14** जगन्ति ] $MVA_1B_1L_1$; जगति $K_1$ **14** °रः शरीररहितो ] $MVA_1B_1L_1$; °ररहितो $K_1$

रीरमपि च तदीयं कार्यं नित्यं वा भवेत्। सर्वथानुपपत्तिः।

अशरीरस्य कर्तृत्वं दृश्यते न हि कस्यचित्।
देहो ऽप्युत्पत्तिमानस्य देहत्वाच्चैत्रदेहवत्॥

कार्यमपीश्वरशरीरं तत्कर्तृकं वा स्यादीश्वरान्तरकर्तृकं वा। तत्र

स्वयं निजशरीरस्य निर्माणमिति साहसम्।
कर्त्रन्तरकृते तस्मिन्नीश्वरानन्त्यमापतेत्॥

भवतु को दोष इति चेत्। प्रमाणाभाव एव दोषः। एकस्यापि तावदीश्वरस्य साधने पर्याकुलतां गताः, किं पुनरनन्तानाम्।

[2.2.2.5 सृष्टिप्रकारः]

किञ्च व्यापारेण वा कुलालादिरिव कार्याणि सृजेदीश्वर इच्छामात्रेण वा। द्वयमपि दुर्घटम्।

---

2 अशरीरस्य ⋯ कस्यचित् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 47cd: शरीरादेर्विना चास्य कथमिच्छापि सर्जने॥

3 देहो ⋯ °देहवत् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 77cd: उत्पत्तिमांश्च तद्देहो देहत्वाद् अस्मदादिवत्॥

5 स्वयं ⋯ साहसम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 48ab: शरीराद्यथ तस्य स्यात् तस्योत्पत्तिर्न तत्कृता।

6 कर्त्रन्तर° ⋯ °मापतेत् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 48c: तद्वदन्यप्रसङ्गो ऽपि

---

1 शरीरमपि च तदीयं ] MA$_1$B$_1$L$_1$; तदीयं शरीरं V; शरीरमपि तदीयं K$_1$ 1 सर्वथा° ] MVA$_1$B$_1$L$_1$; सर्वथा चा° K$_1$ 4 °श्वरश° ] MVA$_1$B$_1$K$_1$; °श्वश° L$_1$ 4 तत्कर्तृकं ] MVA$_1$B$_1$L$_1$; तत्कर्तृकमेव K$_1$ 4 स्यादीश्वरान्तरकर्तृकं वा ] MVB$_1$K$_1$L$_1$; om. M$^{ka}$A$_1$ 5 निर्माणमिति ] MVA$_1$B$_1$L$_1$; निर्माणमति° K$_1$ 6 कर्त्र° ] MVB$_1$K$_1$L$_1$; तत्र° A$_1$ 7 प्रमाणा° ] MVA$_1^{pc}$B$_1$K$_1$L$_1$; प्रामाणा° A$_1^{ac}$ 8 °श्वरस्य साधने ] MVB$_1$; °श्वरसाधने A$_1$L$_1$; °श्वरस्य साधने वयमपि च K$_1$ 8 पर्याकुल° ] MVA$_1$B$_1$K$_1$; पर्यायकुल° L$_1$ 8 °न्तानाम् ] MVA$_1$B$_1$K$_1$; +++ K$_1$ 11 द्वयमपि ] MVA$_1$B$_1$L$_1$; द्वयमपि च K$_1$

व्यापारेण जगत्सृष्टिः कुतो युगशतैरपि ।
तदिच्छां चानुवर्तन्ते न जडाः परमाणवः ॥

[2.2.2.6 सृष्टिप्रयोजनम्]

अपि च किं किमपि प्रयोजनमनुसन्धाय जगत्सर्गे प्रवर्तते प्रजापतिरेवमेव वा । निष्प्रयोजनायां प्रवृत्तावप्रेक्षापूर्वकारित्वादुन्मत्ततुल्यो ऽसौ भवेत् । उत्तरो ऽपि नास्ति पक्षः ।

अवाप्तसर्वानन्दस्य रागादिरहितात्मनः ।
जगदारभमाणस्य न विद्मः किं प्रयोजनम् ॥

[2.2.2.7 ईश्वरस्याकारुणिकत्वम्]

अनुकम्पया प्रवर्तत इति चेत् । मैवम् ।

सर्गात्पूर्वं हि निःशेषक्लेशसंस्पर्शवर्जिताः ।
नास्य मुक्ता इवात्मानो भवन्ति करुणास्पदम् ॥

---

**1** व्यापारेण … परमाणवः ] *Ślokavārttika saṃbandhākṣepaparihāra*, vv. 81–82ab: कुलालवच्च नैतस्य व्यापारो यदि कल्प्यते (कल्प्यते] corr.; कल्पते ed.) । अचेतनः कथं भावस्तदिच्छामनुरुध्यते ॥ तस्मान्न परमाण्वादेरारम्भः स्यात्तदिच्छया ।

**4** किमपि प्रयोजन° … °न्मत्ततुल्यो ऽसौ भवेत् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 55: प्रयोजनमनुद्दिश्य न मन्दो ऽपि प्रवर्तते । एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत् ॥

**7** अवाप्त° … प्रयोजनम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 54cd: जगच्चासृजतस्तस्य किं नामेष्टं न सिध्यति ॥

**11** सर्गात्पूर्वं … करुणास्पदम् ] Cf. *Ślokavārttika saṃbandhākṣepaparihāra*, v. 52ab: अभावाच्चानुकम्प्यानां नानुकम्पास्य जायते ।

---

**1** °त्सृष्टिः ] $MVB_1K_1L_1$ ; °त्सृ×गे प्रवर्तते प्रजापतिरे×ष्टि $A_1$ **4** °य जगत्सर्गे प्रव° ] $MVA_1B_1L_1$ ; +++++++ $K_1$ **5** °रेवमेव वा ] $MVB_1^{pc}K_1$ ; °रेवमेव $M^{ka}A_1L_1$ ; °रेवं $B_1^{ac}$ **5** °प्रेक्षा° ] $MVA_1B_1K_1$ ; °पेक्षा° $L_1$ **6** °तुल्यो ऽसौ ] $MVA_1B_1L_1$ ; °तुल्यौ सौ $K_1$ **6** उत्तरो ] $M^{ka}A_1B_1K_1L_1$ ; पूर्वो MV **8** °दारभमा° ] $MVA_1B_1L_1$ ; ++++ $K_1$

परमकारुणिकानामपि दुःसहदुःखदहनदन्दह्यमानमनसो जन्तूनवलोकयतामुदेति दया, न पुनरपवर्गदशावदशेषदुःखशून्यानिति।

करुणामृतसंसिक्तहृदयो वा जगत्सृजन्।
कथं सृजति दुर्वारदुःखप्राग्भारदारुणम्॥

अथ केवलसुखोपभोगप्रायं जगत्स्रष्टुमेव न याति, सृष्टमपि वा न चिरमवतिष्ठत इत्युच्यते। तदप्यचारु। निरतिशयस्वातन्त्र्यसीमनि वर्तमानस्य स्वेच्छानुवर्तिसकलपदार्थसार्थस्थितेः परमेश्वरस्य किमसाध्यं नाम भवेत्।

## [2.2.2.8 कर्मापेक्षित्वम्]

नानात्मगतशुभाशुभकर्मकलापापेक्षः स्रष्टा प्रजापतिरिति चेत्। क-

---

**4 कथं** ⋯ **°दारुणम्** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 49cd: प्राणिनां प्रायदुःखा च सिसृक्षास्य न युज्यते॥ v. 52cd: सृजेच्च शुभमेवैकमनुकम्पाप्रयोजितः।

**5 अथ** ⋯ **इत्युच्यते** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 53ab: अथाशुभाद्विना सृष्टिः स्थितिर्वा नोपपद्यते।

**5 याति** ] Cf. *Harṣacarita* 24.24–27 : स्वेच्छोपजातविषयो ऽपि न याति वक्तुं देहीति मार्गणशतैश्च ददाति दुःखम्। मोहात्समाक्षिपति जीवनमप्यकाण्डे कष्टं मनोभव इवेश्वरदुर्विदग्धः॥ (I thank Prof. H. Isaacson for the information.)

**6 निरतिशय°** ⋯ **नाम भवेत्** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 53cd: आत्माधीनाभ्युपाये हि भवेत्किं नाम दुष्करम्॥

**10 नाना°** ⋯ **प्रजापतिना** ] Cf. *Ślokavārttika saṃbandhākṣepaparihāra*, v. 75: कस्यचिद्धेतुमात्रत्वं यद्यधिष्ठातृतेष्यते। कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम्॥

---

**1 °दहन°** ] MV$A_1B_1L_1$ ; om. $K_1$ **1 °दन्दह्यमान°** ] MV$A_1B_1K_1$ ; °सन्दह्यमान° $L_1$ **2 दया** ] MV$A_1B_1L_1$ ; द+ $K_1$ **2 °वदशेष°** ] M$A_1B_1K_1L_1$ ; °वदेषा V **5 केवल°** ] $A_1B_1K_1L_1$ ; केवलं MV **5 न याति** ] $A_1B_1L_1$ ; न जानाति MV; नायाति $K_1$ **7 °दार्थसार्थ°** ] $M^{back}VA_1B_1K_1L_1$ ; °दार्थ° M **10 °पापेक्षः** ] MV$A_1B_1L_1$ ; °पसापेक्षस् $K_1$

र्माण्येव तर्हि सृजन्तु जगन्ति, किं प्रजापतिना।

अचेतनानां चेतनानधिष्ठितानां स्रष्टृत्वमघटमानमिति तेषामधिष्ठाता चेतनः कल्प्यत इति चेत्। न। तदाश्रयाणामात्मनामेव चेतनत्वात्त एवाधिष्ठातारो भविष्यन्ति, किमधिष्ठात्रन्तरेणेश्वरेण। तस्यापि तादृशा परकीयकर्मान्तरापेक्षासङ्कोचितस्वातन्त्र्येण किमैश्वर्येण कार्यम्।

राज्यमिव मन्त्रिपरवशमैश्वर्यं क्वोपयुज्यते तादृक्।
यत्रापरनिरपेक्षं रुच्यैव न रच्यते ऽभिमतम्॥

अन्येनाप्युक्तम्—

किमीश्वरतयेश्वरो यदि न वर्तते स्वेच्छया
न हि प्रभवतां क्रियाविधिषु हेतुरन्विष्यते। इति।

---

**2** अचेतनानां ··· इति चेत् ] *Āgamaḍambara* 174.5–6: नन्वचेतनं चेतनानधिष्ठितं सन्न कारणतामेति।
**3** तदाश्रयाणा° ··· भविष्यन्ति ] *Āgamaḍambara* 174.7–8: ननु चेतनास्तेषामेव कर्मणां कर्तारो ऽधिष्ठातारो भविष्यन्ति।
**5** तस्यापि ··· कार्यम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 54ab: तथा चापेक्षमाणस्य स्वातन्त्र्यं प्रतिहन्यते।
**7** राज्यमिव ··· ऽभिमतम् ] Not recognized as a verse in the Mysore edition; quoted in *Tantrālokaviveka* VIII 68.15–16 (ad 13.100cd–101ab): राज्यमिव मन्त्रिपरवशमैश्वर्यं क्वोपयुज्यते तादृक्। यत्रापरनिरपेक्षं रुच्यैव न रच्यते किंचित्॥ (I thank Prof. H. Isaacson for the information.)
**10** किमीश्वर° ··· °न्विष्यते ] Source unknown.

---

**1** तर्हि ] $A_1B_1K_1L_1$ ; हि तर्हि MV **1** °पतिना ] $MVA_1B_1K_1L_1^{pc}$ ; °पतिर्वा $L_1^{ac}$ **2** अचे° ] $M^{ka}A_1B_1K_1L_1$ ; अथाचे° MV **2** °तनानां ] $MVB_1K_1L_1$ ; °तनां चेतनां $A_1^{ac}$ ; °तनानां चेतनां $A_1^{pc}$ **2** °नधिष्ठितानां ] MV (supported by the usage in sections 3.2.2 and 3.15); °नधिष्ठानां $A_1B_1L_1$ ; °धिष्ठानां $K_1$ **5** °कर्मान्तरा° ] $MVA_1B_1L_1$ ; °कर्मा° $K_1$ **5** °तन्त्र्येण ] $MVA_1B_1K_1$ ; °तन्त्रेण $L_1$

### [2.2.2.9 न क्रीडार्थित्वम्]

अथ क्रीडार्था जगत्सर्गे भगवतः प्रवृत्तिः, ईदृशा च शुभाशुभरूपेण जगता सृष्टेन क्रीडति परमेश्वर इत्युच्यते। तर्हि क्रीडासाध्यसुखरहितत्वेन सृष्टेः पूर्वमवाप्तसकलानन्दत्वं नाम तस्य रूपमपहीयेत।

न च क्रीडापि निःशेषजनतातङ्ककारिणी।
आयासबहुला चेयं कर्तुं युक्ता महात्मनः॥

### [2.2.2.10 ईश्वरस्य संहर्तृत्वाभावः]

तस्मान्न जगतां नामेश्वरः स्रष्टा संहर्तापि भवति।

न ह्यस्य भ्रियमाणेषु पूर्यन्ते जन्तुकर्मसु।
सकृत्समस्तत्रैलोक्यनिर्मूलनमनोरथाः॥
कर्मोपरमपक्षे तु पुनःसृष्टिर्न युज्यते।
न कर्मनिरपेक्षो हि सर्गवैचित्र्यसंभवः॥

अथ ब्राह्मेण मानेन संवत्सरशतनिष्ठामधितिष्ठति परमेष्ठिनि महेश्वर-

---

**2 अथ क्रीडार्था ··· रूपमपहीयेत** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 56ab: क्रीडार्थायां प्रवृत्तौ च विहन्येत कृतार्थता।
**5 न च ··· महात्मनः** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 56cd: बहुव्यापारतायां च क्लेशो बहुतरो भवेत्॥
**8 जगतां नामेश्वरः स्रष्टा** ] Cf. *Nyāyamañjarī* I 588.10: एक एवेश्वरः स्रष्टा जगतामिति साधितम्॥
**11 कर्मोपरमपक्षे ··· युज्यते** ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 71ab: अशेषकर्मनाशे वा पुनःसृष्टिर्न युज्यते।
**13 अथ ब्राह्मेण ··· सकलभुवनप्रलयः** ] Cf. *Padārthadharmasaṅgraha* 9.9–16: ब्राह्मेण मानेन वर्षशतान्ते वर्तमानस्य ब्रह्मणो ऽपवर्गकाले संसारखिन्नानां

---

**2 भगवतः** ] MV$A_1B_1L_1$; भवतः $K_1$ **4 °रहित°** ] MV$A_1^{pc}B_1K_1L_1$; °वरहित° $A_1^{ac}$ **4 रूपमपहीयेत** ] M$B_1L_1$; रूपमवहीयते V; रूपमपहीयते $A_1$; रूपं हीयते $K_1$ **8 नामे°** ] $B_1K_1L_1$; नाथ ई° MV; नाश ई° $A_1$ **8 भवति** ] MV$A_1B_1L_1$; न भवति $K_1$ **9 भ्रिय°** ] MV$B_1^{pc}K_1L_1$; धिय° $A_1$; भ्रिय° $B_1^{ac}$ **9 पूर्यन्ते** ] V$A_1B_1K_1L_1$; पूर्यते M **10 °रथाः** ] V$B_1L_1$; °रथः M$A_1K_1$

स्य संजिहीर्षा जायते। तया तिरोहितस्वफलारम्भशक्तीनि कर्माणि संभवन्तीति संपद्यते सकलभुवनप्रलयः। पुनश्च तावत्येव रात्रिप्राये काले व्यतीते सिसृक्षा भवति भगवतः। तयाभिव्यक्तशक्तीनि कार्यमारप्स्यन्त इति। तदप्ययुक्तम्।

उद्भवाभिभवौ तेषां स्यातां चेदीश्वरेच्छया।
तर्हि सैवास्तु जगतां सर्गसंहारकारणम्।

किं कर्मभिः। एवमस्त्विति चेन्न। ईश्वरेच्छावशित्वपक्षे हि त्रयो दुरतिक्रमा दोषाः। (१) तस्यैव तावन्महात्मनो निष्करुणत्वमकारणमेव दारुणसर्गकारिणः। (२) तथा वैदिकीनां विधिनिषेधचोदनानामानर्थक्यम्, ईश्वरेच्छात एव शुभाशुभफलोपभोगसंभवात्।

---

सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य संजिहीर्षासमकालं शरीरेन्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः; *Nyāyamañjarīgranthibhaṅga* 80.11–13: ब्राह्मेण मानेनेति। दैविकानां युगानां तु सहस्रं परिसङ्ख्यया। ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥ (*Manusmṛti* 1.72) इत्यादिना।

3 तयाभिव्यक्त° ··· तदप्ययुक्तम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 71cd: कर्मणां वाप्यभिव्यक्तौ किं निमित्तं तदा भवेत्॥

5 उद्भवाभिभवौ ··· °कारणम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 72ab: ईश्वरेच्छा यदीष्येत सैव स्याल्लोककारणम्।

7 किं कर्मभिः ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 72cd: ईश्वरेच्छावशित्वे हि निष्फला कर्मकल्पना॥

---

1 महेश्वरस्य ] MVA$_1$B$_1$L$_1$ ; परमेश्वरस्य K$_1$ 1 जायते ] MVB$_1$L$_1$ ; प्रजायते A$_1$ ; सञ्जायते K$_1$ 3 भगवतः ] MVB$_1$K$_1$L$_1$ ; भगवतुः A$_1$ 3 °शक्तीनि ] A$_1$B$_1$L$_1$ ; °शक्तीनि कर्माणि MVK$_1$ 4 °रप्स्यन्त ] VA$_1$B$_1$K$_1$L$_1$ ; °रन्भते M 6 सर्ग° ] MVB$_1$K$_1$L$_1$ ; सर्व° M$^{ka}$A$_1$ 7 चेन्न ] MVB$_1$ ; चेत् M$^{ka}$A$_1$K$_1$L$_1$ 7 °पक्षे हि त्रयो ] MVA$_1$B$_1$L$_1$ ; °पक्षे K$_1$ 8 °तिक्रमा ] MVB$_1$L$_1$ ; °तिकर्म A$_1$ ; °तिक्रामा K$_1$ 8 तावन्म° ] MVA$_1$B$_1$K$_1$ ; तावान्म° L$_1$ 9 °कारणमेव ] MVA$_1$B$_1$L$_1$ ; °कारण° K$_1$ 9 वैदिकीनां ] MVB$_1$K$_1$L$_1$ ; वेदिकीनां A$_1$ 10 °नर्थक्यम् ] MVB$_1$K$_1$L$_1$ ; °नर्थकाम् A$_1$ 10 °रेच्छात ] MVB$_1$K$_1$L$_1$ ; °रच्छात A$_1$

(३) अनिर्मोक्षप्रसङ्गश्च। मुक्ता अपि प्रलयसमय इव जीवाः पुनरीश्वरेच्छया संसरेयुः। तस्मान्नेश्वराधीनो जगतां सर्गः संहारो वा।

[2.3 उपमानाभावः]

इत्यनन्तरगीतेन नयेनेश्वरसाधने।
नानुमानस्य सामर्थ्यम्, उपमाने तु का कथा॥

[2.4 आगमाभावः]

आगमस्यापि नित्यस्य तत्परत्वमसांप्रतम्।
तत्प्रणीते तु विस्रम्भः कथं भवतु मादृशाम्॥
किञ्चागमस्य प्रामाण्यं तत्प्रणीतत्वहेतुकम्।
तत्प्रामाण्याच्च तत्सिद्धिरित्यन्योन्याश्रयं भवेत्॥

[2.5 अर्थापत्त्यभावः]

अन्यथानुपपत्त्या तु न शक्यो लब्धुमीश्वरः।
न हि तद्दृश्यते कार्यं तं विना यन्न सिद्ध्यति॥

---

**7** आगमस्यापि ··· °सांप्रतम्] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 61: एवं वेदो ऽपि तत्पूर्वस् तत्सद्भावादिबोधने। साशङ्को न प्रमाणं स्यान्, नित्यस्य व्यापृतिः कुतः॥
**8** तत्प्रणीते ··· मादृशाम्] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 60: न च तद्वचनेनैषां प्रतिपत्तिः सुनिश्चिता। असृष्ट्वापि ह्यसौ ब्रूयादात्मैश्वर्यप्रकाशनात्॥
**9** किञ्चागमस्य ··· भवेत्] *Nyāyamañjarī* I 587.2–4: यदपीतरेतराश्रयमभाषि—पुरुषोक्ते वेदे प्रामाण्यम्, वेदप्रामाण्यात्पुरुषसिद्धिः—इति, तदपि न सम्यक्। पूर्वं परिहृतत्वात्।

---

**1** मुक्ता अपि] MV$A_1B_1L_1$; मुक्ता एव $K_1$ **2** °रेच्छया] MV$A_1^{pc}B_1K_1L_1$; °रेच्छाया $A_1^{ac}$ **2** जगतां] MV$B_1K_1L_1$; जगता $A_1$ **4** °नन्तर°] MV$B_1K_1L_1$; °नंतुर° $A_1$ **8** तत्प्रणीते तु] MV$A_1B_1K_1$; तत्प्रणे तु $L_1$ **10** °माण्याच्च] MV$A_1B_1L_1$; °माण्यच्च $K_1$ **12** °त्त्या तु] MV$A_1B_1L_1$; °त्त्यापि $K_1$ **13** यन्न] MV$B_1K_1L_1$; पुनर्न $A_1$

[2.6 **ईश्वरप्रमाणाभावः**]

तस्मात्सर्वसद्विषयप्रमाणानवगम्यमानस्वरूपत्वादभाव एवेश्वरस्येति सिद्धम्।

[2.7 **लोकप्रसिद्धिनिरासः**]

न च प्रसिद्धिमात्रेण युक्तमेतस्य कल्पनम्।
निर्मूलत्वात्, तथा चोक्तं "प्रसिद्धिर्वटयक्षवत्"॥

[2.8 **न कदाचिदनीदृशं जगत्**]

अत एव निरीक्ष्य दुर्घटं जगतो जन्मविनाशडम्बरम्।
"न कदाचिदनीदृशं जगत्" कथितं नीतिरहस्यवेदिभिः॥

---

**6 प्रसिद्धिर्वटयक्षवत्** ] Cf. *Nyāyamañjarī* I 168.1–2: अनिर्दिष्टप्रवक्तृकप्रवादपरंपरा चैतिह्यम् "इह वटे यक्षः प्रतिवसति" इति। न चायमागमः, आप्तस्योपदेष्टुरनिश्चयादिति।

**9 न कदाचिदनीदृशं जगत्** ] *Tattvasaṅgraha* vv. 2274, 3113 (most probably from the *Bṛhaṭṭīkā*): इष्यते हि जगत्सर्वं न कदाचिदनीदृशम्। न महाप्रलयो (°प्रलयो] 3113; °प्रलये 2274) नाम ज्ञायते (ज्ञायते] 3113; जायते 2274) पारमार्थिकः॥ *Nyāyamañjarī* II 424.3–4: न च "न कदाचिदनीदृशं जगत्" इति पादप्रसारिकामात्रं कर्तुमुचितम्, सर्गप्रलयप्रबन्धस्य समर्थितत्वादिति; *Āgamaḍambara* 244.7–8: न कदाचिदनीदृशं जगत्कथितं तत्रभवद्भिरेव यत्।

---

**2 °षयप्रमाणान°** ] MV$A_1B_1L_1$; °षयान° $K_1$ **3 °रस्येति सिद्धम्** ] MV$A_1B_1L_1$; °रस्य सिद्धः $K_1$ **8 निरीक्ष्य** ] MV$A_1B_1K_1$; निरीक्ष $L_1$ **8 जन्म°** ] MV$B_1K_1$; om. $A_1$; न्म° $L_1$ **9 °नीदृशं** ] MV$B_1K_1L_1$; °नी शं $A_1$(unmetrical)

[3 ईश्वरसाधनानुमानम्]

अत्र वदामः। यत्तावदिदमगादि—नगादिनिर्माणनिपुणपुरुषपरिच्छेददक्षं प्रत्यक्षं न भवति—इति, तदेवमेव। प्रत्यक्षपूर्वमनुमानमपि तेनैव पथा प्रतिष्ठितमिति तदप्यास्ताम्। सामान्यतोदृष्टं तु लिङ्गमीश्वरसत्तायामिदं ब्रूमहे—पृथिव्यादि कार्यं धर्मि, तदुत्पत्तिप्रकारप्रयोजनाद्यभिज्ञकर्तृपूर्वकमिति साध्यो धर्मः, कार्यत्वाद् घटादिवत्।

[3.1 न हेतोरसिद्धता]

[3.1.1 न कार्यत्वमसिद्धम्]

ननु कार्यत्वमसिद्धमित्युक्तम्। क एवमाचष्टे—चार्वाकः शाक्यो मीमांसको वा।

[3.1.1.1 चार्वाकमतम्]

चार्वाकस्तावद् वेदरचनाया रचनान्तरविलक्षणाया अपि कार्यत्वमभ्युपगच्छति यः, स कथं पृथिव्यादिरचनायाः कार्यत्वमपह्नुवीत।

---

**2 यत्तावदिदमगादि** ] See section 2.1.
**4 प्रत्यक्षपूर्वमनुमानमपि** ] See section 2.2.1.
**4 सामान्यतोदृष्टं तु** ] See section 2.2.2.
**10 कार्यत्वमसिद्धमित्युक्तम्** ] See section 2.2.2.1.1.
**13 रचनान्तरविलक्षणाया अपि** ] *Nyāyamañjarī* I 573.12: वेदवाक्यसन्दर्भेषु पदरचनाया स्वरक्रमादिविशेषवत्याः

---

**2 नगादि°** ] $MVB_1K_1L_1$ ; om. $M^{ka}A_1$(eyeskip) **3 °पूर्वमनु°** ] $M^{ka}A_1B_1L_1$ ; °पूर्वकमनु° $MVK_1$ **4 प्रतिष्ठितमिति** ] $MVA_1B_1L_1$ ; प्रतिष्ठित इति $K_1$ **5 पृथिव्यादि** ] $MVA_1B_1K_1$ ; पृथिव्याधि $L_1$ **6 °कर्तृ°** ] $MVA_1B_1K_1$ ; °पुरुष° $K_1$ **10 क** ] $MVB_1K_1L_1$ ; एक $A_1$ **10 शाक्यो** ] $MVB_1K_1$ ; ×रचनायाः का× शाक्यो $A_1$ ; शक्यो $L_1$ **13 चार्वाकस्ता°** ] $MVA_1B_1K_1$ ; चार्वाकास्ता° $L_1$

[3.1.1.2 मीमांसकमतम्]

मीमांसको ऽपि न कार्यत्वमपह्नोतुमर्हति। यत एवमाह— येषामप्यनवगतोत्पत्तीनां रूपमुपलभ्यते, “तन्तुव्यतिषक्तजनितो ऽयं पटस्तद्व्यतिषङ्गविमोचनात् तन्तुविनाशाद्वा नङ्क्ष्यति” इति कल्प्यते—इति। एवमवयवसंयोगनिर्वर्त्यमानवपुषः क्षितिधरादेरपि नाशसंप्रत्ययः संभवत्येव। दृश्यते च क्वचिद् विनाशप्रतीतिः प्रावृषेण्यजलधरधारासारनिर्लुठित एव पर्वतैकदेशे “पर्वतस्य खण्डः पतितः” इति। वस्तुगतयोश्च कार्यत्वविनाशित्वयोः समव्याप्तिकता

---

3 येषामप्यनवग° … कल्प्यते” इति] *Nyāyamañjarīgranthibhaṅga* 80.18–81.2: शब्दाधिकरणे भाष्यं शब्दस्य कारणाभावाद्धेतोः कारणविनाशात् कारणसंयोगविनाशाद्वा विनाशाशङ्काप्रतिषेधपरम् “येषामनवगतोत्पत्तीनां द्रव्याणां भाव एव लक्ष्यते, तेषामपि केषांचिदनित्यता गम्यते, येषां विनाशकारणमुपलभ्यते, यथाभिनवं पटं दृष्ट्वा। न चैनं क्रियमाणमुपलब्धवान्। अथवाऽनित्यत्वमस्याध्यवस्यति रूपमेव हि दृष्ट्वा। तन्तुव्यतिषङ्गजनितो ऽयं तद्व्यतिषङ्गविमोचनात् तन्तुविनाशाद्वा विनङ्क्ष्यतीत्येवमवगच्छन्ति। न चैवं शब्दस्य किंचित्कारणमुपलभामहे यद्विनाशाद्विनङ्क्ष्यतीत्यवगम्यते” (*Śābarabhāṣya* ad 1.1.21) इति भाष्यम्; *Śābarabhāṣya* ad 1.1.21: येषामनवगतोत्पत्तीनां द्रव्याणां भाव एव लक्ष्यते, तेषामपि केषांचिदनित्यता गम्यते, येषां विनाशकारणमुपलभ्यते, यथाभिनवं पटं दृष्ट्वा। न चैनं क्रियमाणमुपलब्धवान्। अथवानित्यत्वमवगच्छति रूपमेव दृष्ट्वा। तन्तुव्यतिषङ्गजनितो ऽयं तन्तुव्यतिषङ्गविनाशात्तन्तुविनाशाद्वा विनंक्ष्यतीत्यवगच्छति। नैवं शब्दस्य किंचित्कारणमवगम्यते यद्विनाशाद्विनंक्ष्यतीत्यवगम्यते।

---

2 °मपह्नोतुमर्हति] MVK$_1$; °मपह्नोति A$_1$B$_1$L$_1$ 3 °लभ्यते] MVA$_1$K$_1$L$_1$; °लभ्यते तेषामपि B$_1$ 3 °व्यतिषक्त°] MVA$_1$B$_1$L$_1$; °व्यतिषंग° K$_1$ 4 °तिषङ्ग°] MVB$_1$K$_1$L$_1$; °तिषुग° A$_1$ 4 नङ्क्ष्य°] MVA$_1$B$_1$L$_1$; विनङ्क्ष्य° K$_1$ 6 °संप्रत्ययः] MVA$_1$B$_1$L$_1$; °प्रत्ययः K$_1$ 6 °प्रतीतिः] MVA$_1$B$_1$L$_1$; °प्रतीतिः यथा K$_1$ 7 °निर्लुठित] MVB$_1$K$_1$L$_1$; °नि×वर्त्यमानवपुषः×र्लुठित A$_1$ 8 °तः” इति। वस्तुगतयोश्च] MVB$_1$L$_1$; °त इति वस्तुगतयाश्च A$_1$; ++++++++K$_1$ 8 °विनाशित्वयोः] MVA$_1$B$_1$K$_1$; °विनाशत्वयोः L$_1$ 8 समव्या°] MVA$_1$B$_1$K$_1$; समवा° L$_1$ 8 °प्तिकता … °संमतौ] MVB$_1$K$_1$L$_1$; °प्तिकसम्मतौ A$_1$

वार्त्तिककृताप्युक्तैव—

तेन यत्राप्युभौ धर्मौ व्याप्यव्यापकसंमतौ।
तत्रापि व्याप्यतैव स्यादङ्गं न व्यापिता मितेः॥

इति वदता। तस्माद्विनाशित्वेनापि कार्यत्वानुमानात् तन्मते ऽपि न कार्यत्वमसिद्धम्।

## [3.1.1.3 शाक्यमतम्]

शाक्यो ऽपि कार्यत्वस्य कथमसिद्धतामभिदधीत, येन नित्यो नाम पदार्थः प्रणयकेलिष्वपि न विषह्यते।

## [3.1.1.4 उपसंहारः]

तस्मात्सर्ववादिभिरप्रणोद्यं पृथिव्यादेः कार्यत्वम्।

## [3.1.2 सन्निवेशविशिष्टत्वं नासिद्धम्]

अथवा सन्निवेशविशिष्टत्वमेव हेतुमभिदध्महे, यस्मिन्प्रत्यक्षत उपलभ्यमाने सर्वापलापलम्पटा अपि न केचन विप्रतिपत्तुमुत्सहन्ते। तस्मान्नासिद्धो हेतुः।

## [3.1.2.1 सन्निवेशवैलक्षण्यम्]

ननु कर्त्रविनाभावितया यथाविधस्य सन्निवेशस्य शरावादिषु दर्शन-

---

**2** तेन ··· व्यापिता मितेः ] *Ślokavārttika anumāna*, v. 9
**12** सन्निवेशविशिष्टत्व° ] See section 2.2.2.1.2.

---

**3** तत्रापि व्या° ] $MVB_1K_1$; तत्राप्यव्या° $A_1L_1$ **3** स्यादङ्गं न ] $MVA_1B_1L_1$; स्यादनंग $K_1$ **3** °ता मितेः ] $A_1B_1K_1L_1$; °तामतिः M; °तर् V(unmetrical) **4** इति वदता ] $MVA_1B_1L_1$; इति $K_1$ **4** °नाशि° ] $MVA_1B_1L_1$; ++ $K_1$ **5** °न्मते ऽपि न कार्यत्वमसि° ] $MVA_1B_1L_1$; +++++++++ $K_1$ **7** °भिदधीत ] $MVA_1B_1L_1$; °भिदधाति $K_1$ **12** सन्निवेश° ] $MVA_1B_1L_1$; सन्निवे+ $K_1$ **12** °त्वमेव हेतु° ] $MVA_1B_1K_1$; °त्वहेतु° $L_1$ **13** सर्वापलाप° ] $MVB_1K_1L_1$; सर्वापालाप° $A_1$ **16** कर्त्र° ] $MVB_1L_1$; वृर्ज° $A_1$; च कर्त्र° $K_1$ **16** सन्निवेशस्य ··· सन्निवेशमुपलभ्य ] $MVB_1K_1L_1$; सन्निवेशमुपलभ्य $A_1$(eye-skip)

म्, तादृशमेव सन्निवेशमुपलभ्य क्वचिदनुपलभ्यमानकर्तृके कलशादौ कर्त्रनुमानमिति युक्तम्। अयं त्वन्य एव कलशादिसन्निवेशात्पर्वतादिसन्निवेशः। नात्र सन्निवेशसामान्यं किञ्चिदुपलभन्ते लौकिकाः। सन्निवेशशब्दमेव साधारणं प्रयुञ्जते। न च वस्तुनोरत्यन्तभेदे सति शब्दसाधारणतामात्रेण तदनुमानमुपपद्यते। न हि पाण्डुतामात्रसाधारणत्वेन धूमादिवन्मङ्कोलरजोराशेरपि कृशानुरनुमातुं शक्यत इति। तदुक्तम्—

सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत्।
सन्निवेशादि तत्तस्माद्युक्तं यदनुमीयते॥
वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः।
न युक्तानुमितिः, पाण्डुद्रव्यादिव हुताशने॥ इति।

---

4 न च वस्तु° ··· °मुपपद्यते ] *Āgamaḍambara* 166.6–8: नन्वन्यत्र वास्तवं सामान्यम्। इह तु शब्दसामान्यमात्रम्, न वस्तुसामान्यम्। शब्दसामान्ये चातिप्रसङ्गः।

8 सिद्धं ··· हुताशने ] *Pramāṇavārttika* II (*pramāṇasiddhi*) vv. 11–12 (Miyasaka ed., 12d: °द्रव्यादिवद् धुताशने (unmetrical)); =*Āgamaḍambara* 166.1–2

---

**1** कलशादौ ] MVB$_1$K$_1$L$_1$; कलशादी A$_1$ **3** °सामान्यं ] MVA$_1$L$_1$; °सामान्यं धूमत्वादितुल्यं B$_1$K$_1$ **4** °शब्दमेव ] MVA$_1$B$_1$L$_1$; °शब्दमेव केवलं K$_1$ **4** न च ] MVA$_1$B$_1$L$_1$; न हि K$_1$ **5** °साधारणतामात्रेण तद° ] MVB$_1$K$_1$L$_1$; °साधारनुतद° A$_1$ **5** न हि ] MVA$_1$B$_1$K$_1$; हि L$_1$ **6** °दिवन्मङ्कोल° ] M$^{back}$A$_1$B$_1$L$_1$; °दिव कङ्कोल° M; °दिवन्मुकुल° V; °दिरिव मकोल° K$_1$ **6** कृशानु° ] MVA$_1$B$_1$K$_1$; कृशाणु° L$_1$ **6** शक्यत ] MVA$_1$B$_1$L$_1$; शक्येत K$_1$ **8** यादृगधि° ] MVB$_1$K$_1$L$_1$; यादृगमधि° A$_1$ **9** तत्तस्माद्युक्तं यदनु° ] MVA$_1$B$_1$L$_1$; तद्युक्तन्तस्माद्यनु° K$_1$(unmetrical) **10** वस्तुभेदे ] MA$_1$B$_1$K$_1$; वस्तुभेद° VL$_1$ **10** प्रसिद्धस्य ] MVA$_1$B$_1$L$_1$; प्रसिद्धे च K$_1$ **11** हुताशने ] MV; हुताशनः M$^{ka}$A$_1$B$_1$L$_1$; हुताशिन K$_1$

[3.1.2.2 तत्परिहारः]

उच्यते। यादृगिति न बुद्ध्यामहे। धूमो हि महानसे कुम्भदासीफूत्कारमारुतसंधुक्ष्यमाणमन्दज्वलनजन्मा कृशप्रायप्रकृतिरुपलब्धः। स यदि पर्वते प्रबलसमीरणोल्लसितहुतवहप्लुष्यमाणमहामहीरुहस्कन्धेन्धनप्रभवो बहुलबहुलः खमण्डलमखिलमाक्रामन्नुपलभ्यते, तत्किमिदानीमनलप्रमितिं मा कार्षीत्।

[3.1.2.3 वस्तुसामान्यम्]

अथ विशेषरहितं धूममात्रमग्निमात्रेण व्याप्तमवगतमिति ततस्तदनुमानम्। इहापि सन्निवेशमात्रं कर्तृमात्रेण व्याप्तमिति ततो ऽपि तदनुमीयताम्।

[3.1.2.4 शब्दमात्रसामान्यनिरासः]

ननु सन्निवेशशब्दसाधारणमात्रमत्र, न वस्तुसामान्यं किञ्चिदस्ति। भिक्षो, धूमे ऽपि भवद्दर्शने किं वस्तुमात्रमस्ति।

---

**2** यादृगिति न बुद्ध्यामहे ] *Āgamaḍambara* 166.15–16: न परस्परतः साम्यं कार्याणामपि भूयसाम्। तदिमे यादृगित्यस्य पदस्यार्थं न मन्महे॥
**2** धूमो हि ··· °पलभ्यते ] *Āgamaḍambara* 164.15–16: अन्य एव हि धूमो ऽसौ कृशजन्मा महानसे। अन्य एवायमद्रौ च व्याप्तव्योमदिगन्तरः॥
**13** भिक्षो ··· वस्तुमात्रमस्ति ] *Āgamaḍambara* 166.9–10: कुतो बौद्धगृहे वास्तवं सामान्यम्।

---

**3** °दासी° ] MV$A_1B_1L_1$; °दासीवदन° $K_1$ **3** °मन्द° ] MV$B_1K_1L_1$; °मद° $A_1$ **3** °जन्मा ] MV$A_1B_1K_1$; °जन्म° $L_1$ **4** °ल्लसित° ] MV$B_1L_1$; °ल्लसीत° $A_1K_1$ **5** °स्कन्धे° ] MV$A_1B_1K_1$; °स्कन्दे° $L_1$ **5** बहुलबहुलः ] MV$B_1K_1L_1$; वहलवहलः $A_1$ **5** खमण्डल° ] MV$B_1K_1L_1$; स्वमण्डल° $A_1$ **6** °प्रमितिं ] MV$B_1K_1L_1$; °नमितिं $A_1$ **6** कार्षीत् ] MV$A_1B_1L_1$; कार्षीः $K_1$ **12** °शब्द° ] MV$K_1L_1$; °श° $A_1$; °शब्दे $B_1$ **12** °साधारणमात्रमत्र ] $A_1B_1K_1L_1$; °मात्रसाधारण्यमत्र M; °साधारण्यमात्रमत्र V **13** धूमे ] V$A_1B_1K_1L_1$; धूमो M **13** वस्तुमात्र° ] $M^{ka}A_1B_1L_1$; वस्तुसामान्य° MV$K_1$

मा भूद्वस्तुसामान्यम्। अन्यव्यावृत्तिरूपं तु संव्यवहारकारणमस्त्येव। हन्त तर्हि प्रकृते ऽप्यसन्निवेशव्यावृत्तिरूपं भवतु सामान्यम्, आकाशकालादिविलक्षणरूपत्वात्पृथिव्यादेः।

ननु तत्र धूमो धूम इत्यनुवृत्तविकल्पबलेन कल्पितमपोहस्वभावं सामान्यमभ्युपगतम्। इहापि सन्निवेशविकल्पानुवृत्तेस्त्वत्प्रकल्पितमपोहरूपमेव सामान्यमिष्यताम्।

### [3.1.2.5 न सर्वात्मना तुल्यत्वम्]

अपि च सकर्तृकत्वाभिमतेष्वपि संस्थानेषु न सर्वात्मना तुल्यत्वं प्रतीयते। न हि घटसंस्थानं पटसंस्थानं चतुःशालसंस्थानं च सुसदृशमिति। संस्थानसामान्यं तु पर्वतादावपि विद्यत एवेति सर्वथा "यादृक्" इत्यवाचको ग्रन्थः।

### [3.2 न हेतोरनैकान्तिकत्वम्]

यदपि व्यभिचारोद्भावनमकृष्टजातैः स्थावरादिभिरकारि, तदपि न चारु, तेषां पक्षीकृतत्वात्। पक्षेण च व्यभिचारचोदनायां सर्वानुमानोच्छेदप्रसङ्गः।

---

**8** न सर्वात्मना तुल्यत्वं ] *Āgamaḍambara* 166.3–5: धर्मं नियतमालम्ब्य भवति ह्यनुमाक्रमः। क्व वा सर्वात्मना साम्यं साध्यदृष्टान्तधर्मिणोः॥
**13** यदपि … °रकारि ] See section 2.2.2.2.

---

**1** अन्य° ] $M^{ka}A_1B_1K_1L_1$ ; आकाशकालादि° MV **2** सामान्यम् … सामान्यमभ्युपगतम् ] $MVB_1K_1L_1$ ; सामान्यमभ्युपगतम् $A_1$(eyeskip) **4** °नुवृत्त° ] $MVB_1K_1L_1^{pc}$ ; °नुवृत्ति° $L_1^{ac}$ **5** °नुवृत्ते° ] $MVA_1B_1L_1$ ; °नु° $K_1$ **9** घटसंस्थानं पटसंस्थानं ] $VA_1B_1$ ; घटसंस्थानं $MK_1L_1$ **10** पर्वतादावपि ] $MVB_1K_1L_1$ ; पर्वतावपि $A_1$ **11** यादृक्" इ° ] $MVB_1K_1$ ; यागि° $A_1L_1$(marked) **11** ग्रन्थः ] $MVB_1K_1L_1$ ; ग्रथः $A_1$ **13** व्यभिचारो° ] $MVA_1B_1L_1$ ; व्यवहारो° $K_1$ **14** च व्यभिचार° ] $MVB_1L_1$ ; च व्यभिचाम° $A_1$ ; व्यभिचार° $K_1$

### [3.2.1 वनस्पतिप्रभृतीनां कर्तुरदृश्यानुपलब्धिः]

ननु च पृथिव्यादेरुत्पत्तिकालस्य परोक्षत्वात्कर्ता न दृश्यत इति तदनुपलब्ध्या तदसत्त्वनिश्चयानुपपत्तेः कामं संशयो ऽस्तु। वनस्पतिप्रभृतीनां तु प्रसवकालमद्यत्वे न वयमेव पश्यामः। न च यत्नतो ऽप्यन्वेषमाणाः कर्तारमेषामुपलभामहे। तस्मादसौ दृश्यानुपलब्धेर्नास्त्येवेत्यवगच्छामः। अपि च येन येन वयं व्यभिचारमुद्भावयिष्यामः, तं तं चेत्पक्षीकरिष्यति भवान्, सुतरामनुमानोच्छेदः, सव्यभिचाराणामप्येवमनुमानत्वानपायात्।

उच्यते। स्थावराणामुत्पत्तिकालप्रत्यक्षत्वे ऽपि कर्तुरदृश्यत्वमेव, अशरीरत्वनिश्चयात्। अशरीरस्य तर्हि तदुत्पत्तावव्याप्रियमाणत्वात्कर्तृत्वमपि कथमिति चेत्। एतदग्रतो निर्णेष्यते। अदृश्यस्य च कर्तुरनुपलब्धितो नास्तित्वनिश्चयानुपपत्तेर्नाकृष्टजातवनस्पतीनामकर्तृकत्वमिति न विपक्षता।

---

**4** वनस्पतिप्रभृतीनां तु ··· °वगच्छामः ] See the second verse of section 2.2.2.2.
**11** निर्णेष्यते ] See section 3.10.

---

**2** ननु च ] $\mathrm{MVA_1B_1L_1}$; ननु $\mathrm{K_1}$ **2** पृथिव्या° ] $\mathrm{MVB_1K_1L_1}$; पृ×व्य×थिव्या° $\mathrm{A_1}$ **4** प्रसवकाल° ] $\mathrm{MVB_1K_1L_1}$; प्रसवकाल×स्य× $\mathrm{A_1}$ **4** °त्वे न वयमेव ] $\mathrm{MVB_1L_1}$; °त्वे वयमेव $\mathrm{M^{ka}}$; °त्वे न मयमेव $\mathrm{A_1}$; °त्वे नु वयमेव $\mathrm{K_1}$ **5** °दसौ दृ° ] $\mathrm{MVA_1B_1L_1}$; °हृ° $\mathrm{K_1}$ **6** °स्त्येवेत्य° ] $\mathrm{MVB_1K_1L_1}$; °स्त्येत्य° $\mathrm{A_1}$ **7** °नोच्छेदः ] $\mathrm{MA_1B_1K_1L_1}$; °नच्छेदः $\mathrm{V}$ **8** सव्यभिचारा° ] $\mathrm{MVB_1K_1L_1}$; मधिभिचारा° $\mathrm{A_1}$ **8** °त्वानपा° ] $\mathrm{MVA_1B_1L_1}$; °त्वापा° $\mathrm{K_1}$ **9** °मुत्पत्तिकाल° ] $\mathrm{MA_1B_1K_1L_1}$; °मुत्पत्ति° $\mathrm{V}$ **10** °शरीरत्व° ] $\mathrm{MVA_1B_1L_1}$; °शरीत्व° $\mathrm{K_1}$ **10** अशरीरस्य ] $\mathrm{MVA_1B_1K_1L_1}$; शरीरस्य $\mathrm{M^{ka}}$ **10** तर्हि त° ] $\mathrm{MVA_1B_1L_1}$; हित एत° $\mathrm{K_1}$ **11** °प्रियमाणत्वात्क° ] $\mathrm{MVA_1^{pc}B_1K_1L_1}$; °प्रियमात्वात्णक° $\mathrm{A_1^{ac}}$ **11** °र्तृत्वमपि ] $\mathrm{MVB_1K_1L_1}$; °र्तत्वमपि $\mathrm{A_1}$ **12** °वनस्पती° ] $\mathrm{MVA_1B_1L_1}$; °वनस्पत्यादी° $\mathrm{K_1}$ **13** न विपक्षता ] $\mathrm{MA_1B_1K_1^{pc}L_1}$; विपक्षता $\mathrm{V}$; न विपक्षयता $\mathrm{K_1^{ac}}$

### [3.2.2 अदृश्यकर्तृकल्पनोपपत्तिः]

यत्तूक्तम्—परिदृश्यमानक्षितिसलिलादिकारणकार्यत्वात् स्थावराणां किमदृश्यमानकर्तृकल्पनया—इति, तदपेशलम्, परलोकवादिभिरदृश्यमानानां कर्मणामपि कारणत्वाभ्युपगमात्। बार्हस्पत्यानां तु तत्समर्थनमेव समाधिः।

अथ जगद्वैचित्र्यं कर्मव्यतिरेकेण न घटत इति कर्मणामदृश्यमानानामपि कारणत्वं कल्प्यते तत्र। यद्येवम्, अचेतनेभ्यः कारकेभ्यश्चेतनानधिष्ठितेभ्यः कार्योत्पादानुपपत्तेः कर्तापि चेतनस्तेषामधिष्ठाता कल्प्यताम्। तस्मात्स्थावराणामकर्तृकत्वाभावान्न विपक्षतेति न तैर्व्यभिचारः।

### [3.2.3 न वादीच्छया पक्षे ऽन्तर्भावः]

यदप्युक्तम्—येन येन व्यभिचार उद्भाव्यते, स चेत्पक्षे ऽन्तर्भावयिष्यते, क इदानीमनुमानस्य नियमः—इति, एतदपि न साधु। यदि हि भवान्निश्चिते विपक्षे वृत्तिमुपदर्शयेत्, कस्तं पक्षे ऽन्तर्भावयेत्। न हि विप्रत्वे पुंस्त्वस्य नित्यतायां वा प्रमेयत्वस्य व्यभिचारे चोद्यमाने वेधसापि विपक्षः पक्षीकर्तुं शक्यः, वादीच्छया वस्तुव्यवस्थाया

---

**2 यत्तूक्तम्** ] See the third verse of section 2.2.2.2.
**12 यदप्युक्तम्** ] See section 3.2.1.

---

**2** परिदृश्य॰ ] $MVA_1B_1K_1$ ; परिदृश॰ $L_1$ **2** ॰कार्यत्वात् ] $MVB_1K_1L_1$ ; ॰कार्यत्वा×भ्युप×त् $A_1$ **3** या—इति ] $MB_1K_1$ ; येति चेत् $VA_1L_1$ **4** ॰दृश्यमानानां ] $MVB_1K_1L_1$ ; ॰दृश्यमानां $A_1$ **4** कारणत्वा॰ ] $MVA_1B_1L_1$ ; कारकत्वा॰ $K_1$ **6** ॰द्वैचित्र्यं ] $MVB_1K_1L_1$ ; ॰द्वेचित्र्यं $A_1$ **6** ॰व्यतिरेकेण न ] $MVB_1K_1L_1$ ; ॰व्यतिरेके×ण× न $A_1$ **7** कारणत्वं कल्प्यते तत्र ] $MVA_1B_1L_1$ ; कारकत्वन्तत्र कल्प्यते $K_1$ **7** ॰चेतनेभ्यः कारकेभ्य॰ ] $MVB_1L_1$ ; ॰चेतनभ्यः कारकेभ्य॰ $A_1$ ; ॰चेतनेभ्य॰ $K_1$ **9** विपक्ष॰ ] $MVB_1K_1$ ; विपक्षि॰ $A_1L_1$ **14** भवान्नि॰ ] $MVB_1K_1L_1$ ; भवत्ति॰ $A_1$ **15** पुंस्त्वस्य नि॰ ] $MVA_1B_1L_1$ ; पुंस्त्वन्नि॰ $K_1$ **15** व्यभिचारे ] $MVA_1B_1K_1$ ; सव्यभिचारे $L_1$

अभावात्। इह तु स्थावरादौ कर्त्रभावनिश्चयो नास्तीत्युक्तम्।

### [3.2.3.1 पक्षनिरासस्तदुत्तरञ्च]

ननु स्थावरेषु पक्षीकृतेष्वपि व्यभिचारो न निवर्तत एव। न हि सपक्षविपक्षव्यतिरेकेण तात्त्विकः पक्षो नाम कश्चिदस्ति, वस्तुनो द्वैरूप्यानुपपत्तेः। वस्तुस्थित्या सकर्तृकाश्चेद्वनस्पतिप्रभृतयः, सपक्षा एव ते। नो चेत्तर्हि विपक्षा एव। न राश्यन्तरं समस्तीति।

उच्यते। पक्षाभावे सपक्षविपक्षवाचोयुक्तिरेव तावत्किमपेक्षा। पक्षानुकूलो हि सपक्ष उच्यते। तत्प्रतिकूलश्च विपक्ष इति।

### [3.2.3.2 पक्षनिरूपणम्]

यद्येवम्, वक्तव्यं तर्हि—को ऽयं पक्षो नाम—इति।

साध्यधर्मान्वितत्वेन द्वाभ्यामप्यवधारितः।
सपक्षस्, तदभावेन निश्चितस्य विपक्षता॥
विमतो यत्र तु तयोस्तं पक्षं संप्रचक्ष्महे।
वस्तुनो ह्यात्मकत्वं तु नानुमन्यामहे वयम्॥

---

1 °त्युक्तम् ] See section 3.2.1.
3 न हि ··· °पपत्तेः ] *Nyāyamañjarī* I 289.6: ननु वस्तूनामद्विरूपत्वात् पक्षो नाम परमार्थतो नास्त्येव।
7 पक्षाभावे ··· किमपेक्षा ] Cf. *Nyāyamañjarī* I 290.3–4: तदभावे तदपेक्षस्वरूपयोः सपक्षविपक्षयोरप्यभावः स्यात्; II 627.14: तदभावे किमपेक्षः सपक्षविपक्षव्यवहारः।

---

1 नास्तीत्यु° ] $MVB_1K_1L_1$; नात्यु° $A_1$ 4 सपक्षविपक्ष° ] $MVB_1L_1$; सपक्ष° $M^{ka}A_1$; +++++क्ष° $K_1$ 6 नो चे° ] $MVA_1B_1K_1$; न चे° $L_1$ 6 राश्य° ] $MVA_1B_1K_1$; राश° $L_1$ 6 °रं समस्तीति ] $MVK_1L_1$; °रसमस्तीति $A_1$; °रमस्तीति $B_1$ 7 सपक्षविपक्षवाचोयुक्ति° ] $MVA_1B_1L_1$; ++++++++++ $K_1$ 10 तर्हि ] $MVA_1B_1L_1$; om. $K_1$ 11 °वधारितः ] $MVB_1K_1L_1$; °व्यधारितः $A_1$ 13 °ता॥ विमतो यत्र तु तयोस्तं प° ] $MVA_1L_1$; °ता विमतिर्यत्र तु तयोस्तं प° $B_1$; +++++++++++ $K_1$ 14 ह्यात्मकत्वं तु ] $MVA_1B_1^{pc}$; ह्याकत्वं तु $B_1^{ac}$(unmetrical); ह्यात्मकत्वं हि $K_1$; ह्यात्मकं तु $L_1$(unmetrical)

वादिबुद्ध्यनुसारेण स्थितिः पक्षस्य यद्यपि ।
तथापि व्यवहारो ऽस्ति वस्तुतस्तन्निबन्धनः ॥

सन्दिग्धे हि न्यायः प्रवर्तते नानुपलब्धे न निर्णीत इत्युक्तमेतत् । सन्दिह्यमान एव चार्थः पक्ष इत्युच्यते । किञ्चित्कालं तस्य पक्षत्वं यावन्निर्णयो नोत्पन्नः । तदुत्पादे तु नूनं सपक्षविपक्षयोरन्यतरत्रानुप्रवेक्ष्यत्यसौ । अतश्च पक्षावस्थायां तेन व्यभिचारोद्भावनमसमीचीनम् ।

[3.2.3.3 सन्दिग्धविपक्षवृत्तित्वम्]

ननु निश्चितविपक्षवृत्तिरिव सन्दिग्धविपक्षवृत्तिरपि न हेतुरेव । तदेवं वीरुधादिषु सन्दिग्धे ऽपि कर्तरि सन्निवेशस्य दर्शनादहेतुत्वम् ।

नैतत्सारम्, सदसत्पावकतया पर्वते सन्दिग्धे विपक्षे वर्तमान-

---

**3** इत्युक्तमेतत् ] *Nyāyamañjarī* I 23.4–5: तत्र नानुपलब्धे ऽर्थे न निर्णीते प्रवर्तते । किन्तु संशयिते न्यायः, तदङ्गं तेन संशयः ॥

**5** किञ्चित्कालं ··· नोत्पन्नः ] Cf. *Nyāyamañjarī* II 627.16: किञ्चित्कालमन्यतरासिद्धिवद् विमतिपथापतितस्य वस्तुनः पक्षत्वमुपेयते ।

**6** तदुत्पादे ··· °त्यसौ ] Cf. *Nyāyamañjarī* II 627.17: निर्णयजन्मा तु विमतिविरतौ नूनमन्यतरवर्गपतितो ऽसौ भविष्यति ।

**8** ननु ··· न हेतुरेव ] Cf. *Nyāyamañjarī* I 291.2–3: ननु न पर्वतो ऽग्निमत्तया निश्चितः, नापि तद्वैपरीत्येन, किन्तु सन्दिग्ध एवास्ते; II 627.10–11: निश्चितविपक्षवृत्तिवत् संशयितविपक्षवृत्तिरपि नानैकान्तिकतामतिवर्तत इति सर्वानुमानानामेव निवापाञ्जलिर्दत्तः स्यात् ।

**10** सदसत्पावकतया ··· °च्छेदः ] Cf. *Nyāyamañjarī* I 291.3–5: यद्येवं सन्दिग्धे

---

**1** वादि° ] MVA$_1$B$_1$L$_1$ ; गवादि° K$_1$(unmetrical)  **3** हि ] MVA$_1$B$_1$L$_1$ ; हि वस्तुनि K$_1$  **4** इत्युक्तमेतत् । सन्दिह्यमान ] MVA$_1$B$_1$L$_1^{pc}$ ; ++++++++ K$_1$ ; इत्युक्तमेतत् सन्दिग्धमान L$_1^{ac}$  **4** इत्युच्यते ] A$_1$B$_1$K$_1$L$_1$ ; उच्यते MV **4** किञ्चि° ] MVA$_1$B$_1$L$_1$ ; कञ्चि° K$_1$  **5** तदुत्पादे ] MVB$_1$K$_1$L$_1$ ; तथपादे A$_1$ **5** °तरत्रानु° ] MVA$_1$B$_1$L$_1$ ; om. K$_1$  **6** पक्षा° ] MVA$_1$B$_1$K$_1$ ; पेक्षा° L$_1$ **6** °द्भावन° ] MVA$_1$B$_1$K$_1$ ; °द्भावनन° L$_1$  **6** °मसमीचीनम् ] MVB$_1$K$_1$L$_1$ ; °मः सीचीनम् A$_1$  **8** ननु ] MVA$_1$B$_1$L$_1$ ; ननु च K$_1$  **8** स° ] MVA$_1$K$_1$ ; स स° B$_1$L$_1$  **9** वीरुधा° ] MA$_1$B$_1$K$_1$L$_1$ ; वीरुदा° V  **9** °हेतुत्वम् ] MB$_1$K$_1$L$_1$ ; °हेतुत्वात् V ; °हेत्तत्वात् A$_1$

स्य धूमस्याहेतुत्वप्रसङ्गात्। सर्व एव च साध्यांशसंशयाद्विपक्षा एव जाता इति पक्षवृत्तयो हेतव इदानीं विपक्षगामिनो भवेयुरित्यनुमानोच्छेदः।

अथ पक्षीकृते ऽपि धर्मिणि सदसत्साध्यधर्मतया सन्दिग्धे ऽपि वर्तमानो धूमादिरन्यत्र व्याप्तिनिश्चयाद्गमक इष्यते, तर्हि सदसत्कर्तृकतया सन्दिग्धे ऽपि वसुन्धरावनस्पत्यादौ वर्तमानं कार्यत्वमन्यत्र व्याप्तिनिश्चयाद्गमकमिष्यताम्। विशेषो वा वक्तव्यः।

### [3.2.4 न पृथिव्यादिभिर्व्यभिचारः]

#### [3.2.4.1 व्याप्तिग्रहणप्रकारः]

अन्ये मन्यन्ते। किमकृष्टजातस्थावरादिव्यभिचारस्थानान्वेषणेन, पृथिव्यादिभिरेवात्र व्यभिचारः, अस्य व्याप्तिग्रहणस्य प्रतीघातात्। व्याप्तिर्हि गृह्यमाणा सकलसपक्षविपक्षक्रोडीकारेण गृह्यते। इत्थं च तस्यां गृह्यमाणायामेव "यद्यत्सन्निवेशविशिष्टं तत्तद्बुद्धिमत्कर्तृकम्" इत्यस्मिन्नेवावसरे सन्निवेशवन्तो ऽपि कर्तृशून्यतया शैलादयश्चेतसि स्फुरन्ति। यथा कृतकत्वेन वह्नेरनुष्णतानुमाने "यद्यत्कृतकं तत्तद-

---

ऽपि विपक्षे वर्तमानो धूमादिरहेतुरेव स्यात्। निश्चितविपक्षवृत्तिवत् सन्दिग्धविपक्षवृत्तेरप्यहेतुत्वात् सर्वमनुमानमुत्सीदेत्।

---

**1** च ] $MVA_1L_1$; च पक्षा $B_1$; च पक्षात् $K_1$ **2** इति ] $MVA_1L_1$; इति सर्वे $B_1$; इति सर्व एव $K_1$ **4** °कृते ऽपि ] $MVA_1B_1L_1$; °कृते $K_1$ **4** °ग्धे ऽपि ] $MA_1B_1K_1L_1$; °ग्धे V **6** वसुन्धरा° ] $MVA_1B_1L_1$; वसुन्धरादौ $K_1$ **7** विशेषो ] $MVB_1K_1L_1$; विशेषो×च्छेदः अथ पक्षीकृते पि धर्मिणि सदसत्साध्यधर्मतया संदिग्धे पि वर्तमानो धूमादि× $A_1$ **11** °स्य व्याप्ति° ] $MVA_1B_1L_1$; °स्य आप्ति° $K_1$ **11** प्रतीघातात् ] $VA_1B_1$; प्रतिघातात् M; प्रतिघातत्वात् $K_1$; प्रतीघात् $L_1$ **13** यद्यत्स° ] $MVB_1K_1L_1$; यत् स° $A_1$ **14** कर्तृशून्यतया शैलादयश्चेतसि ] $MVA_1B_1L_1$; शैलादयः कर्तृशून्यतया चेतसि परि° $K_1$ **15** °रनुष्ण° ] $MVA_1K_1L_1$; °रनुस्न° $B_1$

नुष्णम्” इति व्याप्तिपरिच्छेदवेलायामेव “वह्निरुष्णो ऽपि कृतकः” इति हृदयपथमवतरति। तद्वर्जं तु व्याप्तौ गृह्यमाणायां ततो हेतोः षण्ढादिव पुत्रजननमघटमानमेव साध्यानुमानमिति।

तदेतदनुपपन्नम्, विशेषोल्लेखरहितसामान्यमात्रप्रतिष्ठितस्य व्याप्तिपरिच्छेदस्यानुमानलक्षणे निर्णीतत्वात्। अग्न्यनुष्णतानुमाने हि न व्याप्तिग्रहणप्रतीघातादप्रामाण्यम्, अपि तु प्रत्यक्षविरोधादित्युक्तमेतत्।

अपि चायं पृथिव्यादौ कर्त्रनुमाननिरासप्रकारः “शब्दाद्युपलब्धयः करणपूर्विकाः, क्रियात्वात्, छिदिक्रियावत्” इत्यत्र श्रोत्रादिकरणानुमाने ऽपि समानः, प्रतिबन्धावधारणवेलायामेव करणशून्यानां शब्दाद्युपलब्धिक्रियाणामवधारणात्ताभिरेव व्यभिचारात्। पक्षेण च पृथिव्यादिना व्यभिचारचोदनमत्यन्तमलौकिकम्।

---

**2** तद्वर्जं ··· °नुमानमिति ] Cf. *Nyāyamañjarī* II 628.1–2: एष तु ताभ्यामर्थान्तरमिति तत्रागृहीतान्वयव्यतिरेकात्मनियमे हेतुः षण्ढ इव सुतजन्मनि न समर्थ एव साध्योपस्थापने भवेत्।

**5** निर्णीतत्वात् ] *Nyāyamañjarī* I 322.10–11: सकलव्यक्तिविज्ञानमनङ्गं व्याप्तिनिश्चये। भावसामान्ययोर्यद्वत् तथैव तदभावयोः॥ Cf. *Nyāyamañjarī* II 628.4–5: न हि सकलसपक्षविपक्षसाक्षात्करणकारणैकैको- (°णैकैको° ] em.; °णकेको° M; °णकैकैको° $C_1$)-ल्लेखपुरःसरं व्याप्तिग्रहणमिति पूर्वमेव निर्णीतो ऽयमर्थः।

---

**1** °दनुष्ण° ] $MVA_1K_1L_1$; °दनुस्न° $B_1$ **1** °रुष्णो ऽपि ] $MA_1K_1L_1$; °रुष्णो V; °रुस्नो पि $B_1$ **1** कृतकः” इति ] $MB_1K_1L_1$; ऽकृतक इति V; कृत इति $A_1$ **2** तद्वर्जं तु ] $MA_1B_1K_1L_1$; तत्र ह्यति° V **3** षण्ढा° ] V; षण्डा° $MK_1$; शंठा° $A_1B_1$; शण्डा° $L_1$ **4** °रहित° ] $MVA_1L_1$; om. $B_1$; °रहितस्य $K_1$ **4** °प्रतिष्ठितस्य ] $MVA_1B_1L_1$; °प्रतिष्ठस्य $K_1$ **5** °नुष्ण° ] $MVA_1K_1L_1$; °नुस्न° $B_1$ **6** °तीघातादप्रामाण्यम्, अपि तु ] $MVA_1B_1L_1^{pc}$; °तिघातादपि तु $K_1$; °तीघातादिप्रामाण्यमिति तु $L_1^{ac}$ **9** °पूर्विकाः ] $MVA_1K_1L_1$; °पूर्विका $B_1$ **10** °वधारणवेलायामेव ] $MVB_1L_1$; °वधारणवेलाषमेव $A_1$; °धोरणवेलायामेव $K_1$ **11** करण° ] $MVB_1K_1L_1$; कारण° $A_1$ **12** पक्षेण च ] $MVA_1B_1L_1$; पक्षेण $K_1$ **12** पृथिव्यादिना ] $MVB_1K_1L_1$; थिव्यादिना $A_1$

## [3.2.4.2 न वस्तुस्थित्या विपक्षत्वम्]

ननु वस्तुस्थित्या पर्वतादयो ऽपि विपक्षा एव। त्वया तु तेषां पक्ष इति नाम कृतम्। न च त्वदिच्छया वस्तुस्थितिर्विपरिवर्तते। नन्वेवं शब्दाद्युपलब्धयो ऽपि वस्तुस्थित्या विपक्षा एव। तासामपि पक्ष इति नामकरणमेव स्यात्।

न। तासां करणाभावनिश्चयानुत्पादान्न विपक्षत्वम्। पर्वतादावपि कर्त्रभावनिश्चयानुत्पादान्न विपक्षत्वम्।

तेषु कर्ता नोपलभ्यत इति चेत्। शब्दाद्युपलब्धिकरणमपि नोपलभ्यत एव।

करणमदृश्यत्वादेव नोपलभ्यते न नास्तित्वादिति चेत्। कर्ताप्यदृश्यत्वादेव नोपलभ्यते न नास्तित्वात्।

अनुमानात्करणमुपलभ्यते, तद्व्यतिरेकेण क्रियानुपपत्तेः इति चेत्। कर्ताप्यनुमानादुपलप्स्यते, कर्तारमन्तरेण कार्यानुपपत्तेः।

---

**2** °दयो ऽपि ] $MVA_1B_1L_1$; °दयो $K_1$ **3** कृतम्। न च ] $MVA_1B_1L_1$; कृतञ्च $K_1$ **3** वस्तु° ] $MVA_1B_1L_1$; न वस्तु° $K_1$ **4** नन्वेवं ] $MVB_1L_1$; नत्वेवं $A_1$; यद्येवं $K_1$ **4** ऽपि ] $MVB_1K_1L_1$; पि विपक्षा एव त्वया तु तेषां पक्ष इति नाम कृतम् न च त्वदिछया वस्तुस्थितिर्विपरिवर्तते नन्वेवं शब्दाद्युपलब्धयो पि $A_1$(eyeskip) **5** °करणमेव स्यात् ] $MVA_1B_1^{pc}L_1$; °कारणमेव स्यात् $B_1^{ac}$; °करणमेव स्यान्ननु $K_1$ **6** करणा° ] $MB_1K_1L_1$; करण° $VA_1$ **7** पर्वतादावपि ] $MVA_1B_1K_1$; पक्षान्नतावदावपि $L_1$ **8** कर्ता ] $MVB_1K_1L_1$; कर्त्रा $A_1$ **8** °करणमपि ] $M^{back}A_1B_1L_1$; °क␣␣मपि M; °कारणमपि V; °ष्वपि करणन् $K_1$ **10** करणमदृश्य° ] $B_1$; करणमदृश्यमान° $MA_1K_1L_1$; कारणमदृश्यमान° V **10** °त्वादेव ] $MVA_1B_1L_1$; °त्वान् $K_1$ **10** न ना° ] $MVA_1B_1K_1$; ना° $L_1$ **11** °दृश्य° ] $MVA_1B_1K_1$; °दृश्यमान° $K_1$ **13** °नुमानादु° ] $MVA_1B_1L_1^{pc}$; °नुमानाल्लदु° $L_1^{ac}$; °नुमानादेवो° $K_1$

[3.2.4.3 उपसंहारः]

तेनानुमानगम्यत्वान्न कर्तुर्नास्तिताग्रहः।
तदभावाद्विपक्षत्वं क्षित्यादेरपि दुर्भणम्॥
लिङ्गात्पूर्वं तु सन्देहो दहने ऽपि न वार्यते।
तथा सति प्रपद्येत धूमो ऽप्यननुमानताम्॥
अथास्य लिङ्गाभासत्वं क्षित्यादौ कर्त्रदर्शनात्।
धूमे ऽपि लिङ्गाभासत्वं तत्र देशे ऽग्न्यदर्शनात्॥
ननु तं देशमासाद्य गृह्यते धूमलाञ्छनः।
अनयैव धिया साधो वर्धस्व शरदां शतम्॥
यत्पश्चाद्दर्शनं तेन किं लिङ्गस्य प्रमाणता।
अनर्थित्वाद्, अदृष्टे वा कृशानौ किं करिष्यसि॥

तस्मात्सर्वथा नायमनैकान्तिको हेतुः।

[3.3 न हेतोर्विशेषविरुद्धता]

यदपि विशेषविरुद्धत्वमस्य प्रतिपादितम्, तदप्यसमीक्षिताभिधानम्, विशेषविरुद्धस्य हेत्वाभासस्याभावात्, अभ्युपगमे वा सर्वानुमानोच्छेदप्रसङ्गात्। श्रोत्राद्यनुमाने ऽपि यथोदाहृते शक्यमेवमभिधा-

---

14 प्रतिपादितम्] See section 2.2.2.3.

---

4 °त्पूर्वं तु सन्देहो] MVB$_1$K$_1$L$_1$; °त्पूर्वं तु सं×तत्र देशे ग्न्यदर्शनात् ननु×देहे A$_1$ 8 धूम°] MVA$_1^{pc}$B$_1$K$_1$L$_1$; धूमे A$_1^{ac}$ 9 वर्धस्व] MA$_1$B$_1$K$_1$L$_1$; चरस्व V 11 वा] MVK$_1$; व A$_1$B$_1$L$_1$ 12 तस्मा°] MVA$_1$B$_1$K$_1$L$_1^{pc}$; तथस्मा° L$_1^{ac}$ 14 विशेषविरुद्धत्वमस्य ··· विशेषविरुद्धस्य] MVB$_1$K$_1$L$_1$; विशेषविरुद्धस्य A$_1$(eyeskip) 14 °तम्, तद°] MVB$_1$L$_1$; °तद° K$_1$ 15 सर्वा°] MVA$_1$B$_1$L$_1$; सकला° K$_1$

तुम् । यादृगेव लवनक्रियायां दात्रादि करणं काठिन्यादिधर्मकमवगतं तादृगेव श्रोत्रादि स्यात् । तद्विलक्षणकरणसाध्यतायां तु साध्यविकलो दृष्टान्तः, छेदनादिक्रियाणामतीन्द्रियकरणकार्यत्वादर्शनादिति ।

अथ क्रियामात्रं करणमात्रेण व्याप्तमवगतमिति तावन्मात्रमनुमापयति । तदिहापि सन्निवेशमात्रमधिष्ठातृमात्रेण व्याप्तमुपलब्धमिति तावन्मात्रमेवानुमापयतु । विशेषाणां तु न तल्लिङ्गमस्ति यन्न बाधकम् । "अनित्यः शब्दः कृतकत्वात्" इत्ययमपि श्रावणत्वादि शब्दस्य विशेषजातं बाधत एव । धूमो ऽपि पर्वताग्निविशेषान् कांश्चिन्महानसाग्नावदृष्टानपहन्त्येव । तस्माद्यथानिर्दिष्टसाध्यविपर्ययसाधन एव विरुद्धो हेतुः । न हि विशेषविपर्ययावहः । प्रकृतश्च साध्यविपर्ययस्याकर्तृपूर्वकत्वस्य न साधकः, अश्वो ऽयं विषाणित्वादितिवत् । तस्मान्न विरुद्धः ।

---

1 यादृगेव ··· श्रोत्रादि स्यात् ] *Āgamaḍambara* 168.11–14: अपि च लवनक्रियया दात्रमिव छिदिक्रियया परशुरिव रूपोपलब्ध्या यत् करणं लोचनमनुमीयते, तत्र नेत्रस्य दात्रपरश्वधाभ्यां किं साधर्म्यम् ।

---

**1** लवन° ] MV$K_1$ ; लवण° $A_1B_1L_1$ **1** °क्रियायां ] MV$B_1K_1L_1$ ; °क्रियार्था $A_1$ **1** °धर्म° ] MV$A_1B_1K_1$ ; °कर्म° $L_1$ **2** °करण° ] MV$B_1K_1$ ; °कारण° $A_1L_1$ **3** छेदनादि° ··· तदिहापि ] MV$B_1L_1$ ; छेदनादिहापि $A_1$ (eyeskip) ; भेदनादि° ··· तदिहापि $K_1$ **3** °तीन्द्रिय° ] MV$B_1L_1$ ; °तीन्द्रियादि° $K_1$ **4** °त्रम° ] MV$B_1L_1$ ; °त्रमेवा° $K_1$ **6** °मापयतु ] MV$A_1B_1L_1$ ; °मापयति $K_1$ **6** विशेषाणां ] MV$A_1B_1L_1$ ; विशेषणानान् $K_1$ **6** यन्न ] V$A_1B_1K_1L_1$ ; यत्र M **8** पर्वताग्नि° ] MV$A_1B_1L_1$ ; ++++ $K_1$ **9** °साग्नाव° ] MV$A_1^{pc}B_1K_1L_1$ ; °साग्नाकव° $A_1^{ac}$ **10** °साधन एव ] $A_1B_1K_1L_1$ ; °साधनमेव MV **10** न हि ] MV$A_1L_1$ ; न $B_1K_1$ **10** प्रकृतश्च ] $M^{ka}A_1B_1K_1L_1$ ; प्रकृतहेतुश्च MV **11** अश्वो ] MV$A_1B_1L_1$ ; अंशो $K_1$ **12** °तिवत् । तस्मान्न विरुद्धः । ना° ] MV$A_1B_1L_1$ ; +++++++++ $K_1$

### [3.4 न हेतोः कालात्ययापदिष्टता]

नापि कालात्ययापदिष्टः, प्रत्यक्षागमयोर्बाधकयोरदर्शनात्। प्रत्युतागममनुग्राहकमिहोदाहरिष्यामः।

### [3.5 न हेतोः सत्प्रतिपक्षता]

नापि सत्प्रतिपक्षो ऽयं हेतुः, संशयबीजस्य विशेषाग्रहणादेरिह हेतुत्वेनानुपादानात्।

### [3.6 न हेतोरप्रयोजकता]

नाप्ययमप्रयोजको हेतुः। यथा परमाणूनामनित्यत्वे साध्ये मूर्तत्वमभिधास्यते। न हि मूर्तत्वप्रयुक्तमनित्यत्वम्। इह तु कार्यत्वप्रयुक्तमेव सकर्तृकत्वं तत्र तत्रोपलब्धमिति। अत एवानुमानविरोधस्येष्टविघा-

---

**2** कालात्ययापदिष्टः ] *Nyāyakalikā* 15.14–17: प्रत्यक्षागमविरुद्धः कालात्ययापदिष्टः। अबाधितपरपक्षपरिग्रहो हेतुप्रयोगकालः तमतीत्यासावुपदिष्ट इति। “अनुष्णो ऽग्निः, कृतकत्वात्, घटवत्” इति प्रत्यक्षविरुद्धः। “ब्राह्मणेन सुरा पेया, द्रवद्रव्यत्वात्, क्षीरवत्” इत्यागमविरुद्धः।

**3** °मिहोदाहरिष्यामः ] See section 3.9.

**5** सत्प्रतिपक्षो ] Cf. *Nyāyakalikā* 2.19–20: संशयबीजभूतेनानुमानेन रहितत्वमसत्प्रतिपक्षत्वम्।

**5** विशेषाग्रहणा° ] *Nyāyamañjarī* I 467.8–10: पुरोऽवस्थिते धर्मिण्यूर्ध्वत्वादिसाधारणधर्मग्रहणात् स्थाणुपुरुषगतविशेषाग्रहणादुभयविशेषस्मृतेः संशयो भवति

**9** °मभिधास्यते ] *Nyāyamañjarī* II 625.19–626.2: मूर्तत्वं हि सर्वगतेतरद्रव्यपरिमाणविशेषादिधर्मः वस्तुस्वभावमात्रनिबन्धनो न कृतकत्वादिवदनित्यतां प्रयोक्तुमुत्सहते। तथा हि परमाणुषु सिद्धेषु सत्सु तत्र वर्तमानं मूर्तत्वमनित्यतां साधयेत्, अन्यथा त्वाश्रयासिद्धतामुपेयात्।

---

**5** सत्प्रति° ] MV$L_1$; सप्रति° $A_1B_1K_1$ **6** हेतुत्वेना° ] MV$B_1K_1L_1$; हेतत्वेना° $A_1$ **8** नाप्यय° ] MV$A_1B_1L_1$; नाय° $K_1$ **8** °को हेतुः। यथा परमा° ] MV$A_1B_1L_1$; ++++++++ $K_1$ **8** साध्ये ] V$B_1K_1L_1$; सति M; om. $A_1$ (marked) **9** न हि मूर्तत्वप्रयुक्तमनित्यत्वम् ] MV; न हि मूर्तत्वप्रयुक्तम् $A_1L_1$; न ह्यनित्यत्वं मूर्तत्वप्रयुक्तम् $B_1K_1$ **10** सकर्तृत्वं ] MV; सकर्तृकं $B_1$; कर्तृत्वं $A_1L_1$; कर्तृपूर्वकत्वन् $K_1$ **10** तत्र तत्रो° ] MV$A_1B_1L_1$; तत्रो° $K_1$

तकृतश्च न कश्चिदिहावसरः, प्रयोजके हेतौ प्रयुक्ते तथाविधपांसुप्रक्षेपप्रयोगानवकाशात्।

[3.7 उपसंहारः]

तस्मात्परोदीरिताशेषदोषविकलकार्यानुमानमहिम्ना नूनमीश्वरः कल्पनीयः। सकललोकसाक्षिकमपि चानुमानप्रामाण्यमपेक्षणीयम्। अनुमानप्रामाण्यरक्षणे च कृत एव परिकरबन्धः प्रागिति सिद्ध एवेश्वरः।

[3.8 अनुमानान्तरोपन्यासः]

अन्यदपि तदनुमानमन्यैरुक्तम्। महाभूतादि व्यक्तं चेतनाधिष्ठितं सत्सुखदुःखे जनयति, रूपादिमत्त्वात्, तुर्यादिवत्। तथा—पृथिव्यादीनि भूतानि चेतनाधिष्ठितानि सन्ति धारणादिक्रियां कुर्वन्ति, युग्यादिवत्—इति। अत्रापि दोषाः पूर्ववदेव परिहर्तव्याः।

**1** °तकृ° ] MVA$_1$B$_1$L$_1$; ++ K$_1$ **1** हेतौ प्रयुक्ते ] MVA$_1$B$_1$L$_1$; +++++ K$_1$ **2** °प्रक्षेप° ] MVA$_1$B$_1$L$_1$; °प्रक्षेपप्राय° K$_1$ **5** कल्पनीयः ] MVB$_1$L$_1$; काल्पनीयः A$_1$; परिकल्पनीयः K$_1$ **5** °कमपि चा° ] MA$_1$B$_1$; °कम° V; °कमपि ना° K$_1$; °कमग्निवा° L$_1$ **5** °मपेक्ष° ] VB$_1$; °मपीक्ष° MA$_1$L$_1$; °मुपेक्ष° K$_1$ **9** °धिष्ठितं ] MVB$_1$K$_1$; °धिष्ठं A$_1$L$_1$ **10** सत्सुख° ] MVA$_1$B$_1$L$_1$; सत्प्राणिनां सुख° K$_1$ **11** °क्रियां कुर्वन्ति ] MVA$_1$B$_1$L$_1$; °क्रियायां कुर्वन्तनित्यत्वाद् K$_1$

### [3.9 विशेषावगतिः]

#### [3.9.1 तत्प्रमाणम्]

यत्पुनरवादि — कर्तृसामान्यसिद्धौ वा विशेषावगतिः कुतः — इति।

##### [3.9.1.1 आगमात्]

तत्र केचिदागमाद्विशेषप्रतिपत्तिमाहुः —

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः॥ इति।

तथा —

अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति सर्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्॥

इति श्रुतौ पठ्यते। ततः सर्वस्य कर्ता सर्वज्ञ ईश्वरो ज्ञाप्यते।

न च "कार्य एवार्थे वेदः प्रमाणम्" इति मन्त्रार्थवादानाम-

---

**3 यत्पुनरवादि** ] See the last verse of section 2.2.2.3; cf. *Vidhiviveka* 1500.2: सर्वकार्याणां कर्तृत्वादेव तर्हि सर्वज्ञत्वम्; also cf. *Nyāyakaṇikā* thereon, which concludes (1530.2–3): तदनुमानागमाभ्यां सिद्धमीश्वरस्य कर्तृत्वं सर्वज्ञत्वं चेति।
**6 विश्वतश्चक्षुरुत** ··· **देव एकः** ] *Śvetāśvataropaniṣad* 3.3
**9 अपाणिपादो** ··· **महान्तम्** ] *Śvetāśvataropaniṣad* 3.19: अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। सो वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यम् पुरुषम् महान्तम्॥
**12 वेदः** ] *Nyāyamañjarīgranthibhaṅga* 83.10: न च कार्ये एवार्थे वेदः प्रमाणमित्यादि; Cf. *Nyāyamañjarī* I 691.2–3: नन्वेवं विध्यर्थवादमन्त्रनामधेयानां

---

**5 तत्र** ] MV$A_1B_1L_1$; अत्र $K_1$ **5 °प्रतिपत्तिमाहुः** ] MV$B_1K_1$; °प्रतिमाहुः $A_1L_1$ **6 विश्वतोमुखो** ] MV$A_1B_1L_1$; om. $K_1$ **6 विश्वतस्पात्** ] M$B_1K_1$; विश्वतस्पात् मति V; विश्वपात् $A_1L_1$ **7 बाहु°** ] MV$A_1B_1L_1$; बा° $K_1$ **7 धमति** ] MV$K_1$; धमते $A_1B_1L_1$ **7 सं पतत्रै°** ] MV$B_1K_1$; संपतत्त्रे° $A_1$; संपत्त्रै° $L_1$ **7 जनय°** ] MV$A_1B_1K_1L_1^{pc}$; जय° $L_1^{ac}$ **7 एकः** ] MV$B_1K_1L_1$; एक एव $A_1$ **9 गृहीता** ] M$B_1K_1L_1$; ग्रहीता V$A_1$ **10 स वेत्ति** ] MV$A_1B_1L_1$; संवेत्ति $K_1$ **10 सर्वं** ] MV$A_1B_1L_1$; विश्वन् $K_1$ **12 वेदः** ] V; वेदाः M$A_1B_1L_1$; वेद $K_1$

तत्परत्वमभिधातुमुचितम्, कार्य इव सिद्धे ऽप्यर्थे वेदप्रामाण्यस्य वक्ष्यमाणत्वात्। न चेतरेतराश्रयम्, आगमैकशरणत्वाभावादीश्वरसिद्धेः।

[3.9.1.2 केवलव्यतिरेकिबलात्]

अन्ये त्वन्वयव्यतिरेकिहेतुमूलकेवलव्यतिरेकिबलेन विशेषसिद्धिमभिदधति। देहादिव्यतिरिक्तात्मकल्पनमिव सुखदुःखादिगतेन कार्यत्वेन वर्णयिष्यते—पृथिव्यादि कार्यमस्मदादिविलक्षणसर्वज्ञैककर्तृकम्, अस्मदादिषु बाधकोपपत्तौ सत्यां कार्यत्वात्—इति।

[3.9.1.3 पक्षधर्मताबलात्]

अपरे पक्षधर्मताबलादेव विशेषलाभमभ्युपगच्छन्ति। न हीदृशं परिदृश्यमानमनेकरूपमपरिमितमनन्तप्राणिगतविचित्रसुखदुःखसाधनं भुवनादि कार्यमनतिशयेन पुंसा कर्तुं शक्यमिति। यथा चन्दनधूममितरधूमविसदृशमवलोक्य चान्दन एव वह्निरनुमीयते, त-

---

कार्यौपयिकत्वदर्शनात् कार्य एवार्थे वेदः प्रमाणमित्युक्तं स्यात्।

**2 वक्ष्यमाणत्वात्** ] *Nyāyamañjarī* I 702.16–17: प्रमाणता तु गिराम्। सिद्धे कार्ये चार्थे तुल्यैव, प्रमितितुल्यत्वात्॥

**7 वर्णयिष्यते** ] *Nyāyamañjarī* II 279.3–4: इच्छा शरीरादिविलक्षणाश्रया, शरीरादिषु बाधकोपपत्तौ सत्यां कार्यत्वात्; II 567.19–568.1: सो ऽयमन्वयव्यतिरेकवानेव हेतुर्यदा परिदृश्यमानशरीराद्याश्रयव्यतिरिक्ताश्रयाश्रितत्वे साध्ये देहादिषु बाधकोपपत्तौ सत्यां कार्यत्वादिति सविशेषणः प्रयुज्यते, तदा केवलव्यतिरेकी संपद्यते।

---

**5 त्वन्वय॰** ] $MVA_1B_1L_1$; न्वत्यन्व॰ $K_1$ **5 ॰व्यतिरेकि॰** ] $MVA_1B_1K_1L_1^{pc}$; ॰व्यतिरिक्त॰ $L_1^{ac}$ **7 ॰ज्ञैककर्तृकम्** ] $MVA_1B_1L_1$; ॰ज्ञ एककर्तृत्वं $K_1$ **8 ॰कोपपत्तौ** ] $K_1$; ॰कोत्पत्तौ $MVA_1B_1L_1$ **8 कार्य॰** ] $MVA_1B_1L_1$; कार्यक॰ $K_1$ **10 पक्ष॰** ] $MVA_1B_1$; पक्षे $K_1$; क्ष॰ $L_1$ **10 ॰बलादेव** ] $MVA_1B_1L_1$; बलाबलादे $K_1$ **10 ॰गच्छन्ति** ] $MVA_1B_1L_1$; ॰गच्छति $K_1$ **13 ॰धूममितरधूम॰** ] $MVA_1B_1L_1$; ॰धूमं $K_1$ **13 ॰वलोक्य** ] $MVB_1K_1L_1$; ॰वलोका $A_1$ **13 चान्दन** ] $K_1$; चन्दन MV; चानन्द $A_1B_1L_1$

था विलक्षणात्कार्याद्विलक्षण एव कर्तानुमास्यते। स्तवरकेभ्य इव तत्कुशलः कुविन्दः। यथा च कुलालः सकलकलशादिकार्यकलापोत्पत्तिसंविधानप्रयोजनाद्यभिज्ञो भवंस्तस्य कार्यचक्रस्य कर्ता, तथेयतस्त्रैलोक्यस्य निरवधिप्राणिसुखदुःखसाधनस्य सृष्टिसंहारसंविधानं सप्रयोजनं बहुशाखं जानन्नेव स्रष्टा भवितुमर्हति महेश्वरः। तस्मात्सर्वज्ञः।

### [3.9.2 ईश्वरस्य ज्ञानम्]

#### [3.9.2.1 सर्वज्ञता]

अपि च यथा नियतविषयवृत्तीनां चक्षुरादीन्द्रियाणामधिष्ठाता क्षेत्रज्ञस्तदपेक्षया सर्वज्ञः, एवं सकलक्षेत्रज्ञकर्मविनियोगेषु प्रभवन्नीश्वरस्तदपेक्षया सर्वज्ञः। तथा चाह व्यासः—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।

---

**1** तथा विलक्षणा॰ ··· ॰नुमास्यते ] *Nyāyamañjarī* I 581.15: अपि च यद्विलक्षणेयं रचना तद्विलक्षण एव कर्तानुमीयताम्; *Āgamaḍambara* 166.17–18: ॥ वृद्धा॥ ननु विलक्षणमेवेदं क्षित्यादि कार्यम्। ॥ भट्टा॥ ननु विलक्षणमेव कर्तारं कल्पयन्तु भवन्तः।

**1** स्तवरकेभ्य ] *Nyāyamañjarīgranthibhaṅga* 83.12: स्तवरकेभ्य इवेति। पट्टसूत्रनिर्मितचित्ररूपः पटः स्तवरक उच्यते।

**12** द्वाविमौ ··· ईश्वरः॥ *Mahābhārata* 6.37.16–17 = *Bhagavadgītā* 15.16–17

---

**1** ॰षणात्का॰ ] MVA$_1$B$_1$L$_1$; ॰षणका॰ K$_1$ **1** ॰नुमास्यते ] MVB$_1$L$_1$; ॰नुमस्यते A$_1$; ॰नुमीयते K$_1$ **1** स्तवरकेभ्य ] em.; यथा स्तवरकेभ्य A$_1$L$_1$; यथा प्रावरकेभ्य M; यथा सुचेलकेभ्य V; यथा स्तवकेभ्य B$_1^{ac}$; यथा स्तवहकेभ्य B$_1^{pc}$; स्तबरकेभ्य K$_1$ **4** तथेय॰ ] MVA$_1^{pc}$B$_1$L$_1$; तथोय॰ A$_1^{ac}$; तथेस्व॰ K$_1$ **4** ॰स्त्रैलोक्यस्य ] MVA$_1$B$_1$L$_1$; ॰स्त्रेलोकस्य K$_1$ **4** ॰संहारसंविधानं ] MVA$_1$B$_1$L$_1$; ॰संविधान॰ K$_1$ **5** सप्रयोजनं ] MVB$_1$; सप्रयोजन॰ A$_1$L$_1$; ॰प्रयोजनमुपादानञ्च K$_1$ **5** ॰शाखं ] MVB$_1$K$_1$; ॰शाख A$_1$L$_1$ **5** स्रष्टा ] MVB$_1$K$_1$L$_1$; स्तुष्टा A$_1$ **6** ॰त्सर्वज्ञः ] MVA$_1$B$_1$K$_1^{pc}$L$_1$; ॰त् असर्वज्ञः K$_1^{ac}$ **10** क्षेत्रज्ञ॰ ] MVB$_1$K$_1$L$_1$; क्षेत्र॰ A$_1$ **11** सर्वज्ञः ] MVB$_1$K$_1$L$_1$; सर्वज्ञाः A$_1$ **12** द्वाविमौ ] MVB$_1$K$_1$L$_1$; द्वादिसौ A$_1$

क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥

मन्त्रश्च तदर्थानुवादी पठ्यते—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो ऽभिचाकशीति॥ इति।

अतश्च सर्वज्ञ ईश्वरः।

पुंसामसर्ववित्त्वं हि रागादिमलबन्धनम्।
न च रागादिभिः स्पृष्टो भगवानिति सर्ववित्॥
इष्टानिष्टार्थसंभोगप्रभवाः खलु देहिनाम्।
रागादयः कथं ते स्युर्नित्यानन्दात्मके शिवे॥

मिथ्याज्ञानमूलाश्च रागादयो दोषाः, ते कथं नित्यनिर्मलज्ञानवतीश्वरे भवेयुः।

[3.9.2.2 ज्ञानस्य नित्यता]

नित्यं तज्ज्ञानं कथमिति चेत्। तस्मिन्क्षणमप्यज्ञातरि सति तदिच्छाप्रेर्यमाणकर्माधीननानाप्रकारव्यवहारविरामप्रसङ्गात्। प्रलयवे-

---

**5 द्वा सुपर्णा** ] *Nyāyamañjarīgranthibhaṅga* 83.15: द्वा सुपर्णा इति।
**5 द्वा सुपर्णा ··· ऽभिचाकशीति** ] *Muṇḍakopaniṣad* 3.1.1

---

**1 °र उच्यते** ] MV$B_1K_1L_1$ ; °रमुच्यते $A_1$ **3 °विश्य** ] MV$B_1K_1L_1$ ; °विश $A_1$ **3 बिभर्त्यव्यय** ] MV$B_1K_1L_1$ ; विभत्संयष $A_1$ **4 °श्च** ] MV$A_1B_1L_1$ ; °श्चैवन् $K_1$ **5 द्वा** ] MV$A_1B_1K_1$ ; द्वौ $L_1$ **5 सुपर्णा** ] MV$A_1B_1K_1$ ; सुपर्णौ $L_1$ **5 सयुजा** ] MV$A_1B_1K_1$ ; सहजौ $L_1$ **5 सखाया** ] MV$A_1B_1K_1$ ; सखायौ $L_1$ **5 समानं** ] MV$A_1K_1L_1$ ; समान° $B_1$ **6 तयोरन्यः** ] M$K_1L_1$ ; तयोरेकः $M^{back}VA_1B_1$ **6 स्वाद्वत्त्य°** ] MV$A_1B_1K_1$ ; स्वाद्वत्य° $L_1$ **6 ऽभिचाकशी°** ] MV$B_1L_1$ ; भिचाकाशी° $A_1$ ; अत्तिचाकशी° $K_1$ **6 इति** ] MV$A_1B_1L_1$ ; om. $K_1$ **10 °प्रभवाः** ] MV$K_1$ ; °प्रभवः $M^{ka}A_1B_1L_1$ **16 °र्यमाण°** ] MV$B_1K_1L_1^{pc}$ ; °र्यमान° $A_1L_1^{ac}$ **16 °व्यवहार°** ] MV$B_1K_1L_1$ ; °व्यावहार° $A_1$ **16 °विराम°** ] V$A_1B_1K_1L_1$ ; °विरम° M

लायां तर्हि कुतस्तन्नित्यत्वकल्पनेति चेत्। मैवम्। आ प्रलयात्सिद्धे नित्यत्वे तदाविनाशकारणाभावादस्यात्मन इव तज्ज्ञानस्य नित्यत्वं सेत्स्यति। पुनश्च सर्गकाले तदुत्पत्तिकारणाभावादपि नित्यं तज्ज्ञानम्।

### [3.9.2.3 ज्ञानस्याभिन्नता]

एवञ्च तदतीतानागतसूक्ष्मव्यवहितादिसमस्तवस्तुविषयम्, न भिन्नम्, क्रमयौगपद्यविकल्पानुपपत्तेः। क्रमाश्रयणे क्वचिदज्ञातृत्वं स्यादिति व्यवहारलोपः। यौगपद्येन सर्वज्ञातृत्वे कुतस्त्यो ज्ञानभेदः।

### [3.9.2.4 ज्ञानस्य प्रत्यक्षत्वम्]

प्रत्यक्षसाधर्म्याच्च तज्ज्ञानं प्रत्यक्षमुच्यते, न पुनरिन्द्रियार्थसन्निकर्षोत्पन्नत्वमस्यास्ति, अजनकानामेवार्थानां सवितृप्रकाशेनेव तेन ग्रहणात्।

### [3.9.3 गुणान्तरवत्त्वम्]

ज्ञानवदन्ये ऽप्यात्मगुणा ये ऽस्य सन्ति, ते नित्या एव, मनःसंयो-

---

**10** °रिन्द्रियार्थसन्निकर्षोत्पन्नत्वम° ] *Nyāyasūtra* 1.1.4: इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्॥

---

**1** °न्नित्यत्व° ] MVA$_1$B$_1$K$_1$ ; °न्नित्य° L$_1$ **1** °नेति चेत्। मैवम् ] MVB$_1$L$_1$ ; °नेति चेत् सेवम् A$_1$ ; °ना K$_1$ **1** °त्सिद्धे ] MVB$_1$K$_1$L$_1$ ; °त्सिद्ध A$_1$ **2** °दस्यात्मन ] MVA$_1$B$_1$L$_1$ ; °दजात्मान K$_1$ **3** तदुत्पत्ति° ] MVA$_1$B$_1$L$_1$ ; तदुत्पत्तौ K$_1$ **3** °रणाभा° ] MVA$_1$B$_1$L$_1$ ; °रणाभ° K$_1$ **4** नित्यं तज्ज्ञानम् ] B$_1$K$_1$L$_1$ ; नित्यं ज्ञानम् M; नित्यत्वं तज्ज्ञानानाम् V; नित्यं ज्ज्ञानं A$_1$ **6** एवञ्च ] MVA$_1$B$_1$L$_1$ ; एकञ्च K$_1$ **7** °श्रयणे ] MVB$_1$K$_1$L$_1$ ; °श्रयेण A$_1$ **8** व्यवहार° ] MVA$_1^{pc}$B$_1$K$_1$L$_1$ ; वव्यवहार° A$_1^{ac}$ **8** यौगप° ] MVA$_1$B$_1$L$_1$ ; योगप° K$_1$ **8** °ज्ञातृत्वे ] MVB$_1$K$_1$L$_1$ ; °ज्ञातृत्व A$_1$ **8** कुतस्त्यो ] MVA$_1$B$_1$K$_1$ ; कुतो ऽस्य L$_1$ **8** ज्ञानभेदः ] MVA$_1$B$_1$K$_1$ ; विशेषः ज्ञाने भेद K$_1$ **11** °नेव तेन ] MA$_1$B$_1$L$_1$ ; °नेव V; °नैव तेन K$_1$ **14** °दन्ये ] MVB$_1$K$_1$L$_1$ ; °दने A$_1$ **14** सन्ति ] MVA$_1^{pc}$B$_1$K$_1$L$_1$ ; सांदे संति A$_1^{ac}$ **14** मनःसं° ] MVA$_1$B$_1$ ; आत्ममनःसं° K$_1$ ; मनसं° L$_1$

गानपेक्षजन्मत्वात्। दुःखद्वेषास्तस्य तावन्न सन्त्येव। भावनाख्येन संस्कारेणापि न प्रयोजनम्, सर्वदा सर्वार्थदर्शित्वेन स्मृत्यभावात्। अत एव न तस्यानुमानिकं ज्ञानमिष्यते। धर्मस्तु भूतानुग्रहवतो वस्तुस्वाभाव्याद्भवन्न वार्यते। तस्य च फलं परार्थनिष्पत्तिरेव। सुखं त्वस्य नित्यमेव, नित्यानन्दत्वेनागमात्प्रतीतेः, असुखितस्य चैवंविधकार्यारम्भयोग्यताभावात्।

[3.9.4 ईश्वरस्येच्छाप्रयत्नौ]

ननु ज्ञानानन्दवदिच्छापि नित्या चेदीश्वरस्य तर्हि सर्वदा तदिच्छासंभवात्सर्वदा जगदुत्पत्तिरिति जगदानन्त्यप्रसङ्गः। सर्गेच्छानित्यत्वाच्च संहारो न प्राप्नोति। संहारेच्छाया अपि नित्यत्वाभ्युपगमे नक्तंदिनं प्रलयप्रबन्धो न विरमेदेव जगतामिति।

नैष दोषः। अनात्ममनःसंयोगजत्वादिच्छा स्वरूपमात्रेण नित्यापि कदाचित्सर्गेण कदाचित्संहारेण विषयेणानुरज्यते। सर्गसंहारयोरन्तराले तु जगतः स्थित्यवस्थायाम् "अस्मात्कर्मण इदमस्य संपद्यताम्" इतीच्छा भवति प्रजापतेः।

---

**1** ◦पेक्षजन्मत्वात्] MV$A_1^{pc}B_1K_1$; ◦पेक्षजन्मत्वात् अजनकानामेवा $A_1^{ac}$; ◦पेक्षत्वात् $L_1$ **1** ◦द्वेषा◦] MV$A_1B_1L_1$; ◦द्वेषादिधर्मा◦ $K_1$ **1** भावनाख्येन] MV$A_1B_1L_1$; om. $K_1$ **2** ◦त्वेन] MV$A_1B_1L_1$; ◦त्वेनास्य $K_1$ **3** एव न] MV$A_1B_1L_1$; एव $K_1$ **3** ◦ग्रहवतो] MV$A_1L_1$; ◦ग्रहकृतो $B_1K_1$ **4** ◦स्वाभाव्या◦] MV$B_1K_1L_1$; ◦स्वाभाग्रि◦ $A_1$ **8** ननु] MV$A_1B_1K_1L_1$; न $M^{ka}$ **8** ◦दवदि◦] MV$A_1B_1L_1$; ◦दादिवदि◦ $K_1$ **9** ◦दिच्छासंभवात्सर्वदा जगदुत्प◦] MV$B_1L_1$; ◦दिच्छासंभवात्सर्वदा जगजदुत्प◦ $A_1$; ++++++++++++ $K_1$ **10** अपि] MV$A_1B_1L_1$; अपि वा $K_1$ **10** ◦भ्युपगमे] $A_1B_1K_1$; ◦भ्युपगमेन MV$L_1$ **11** ◦दिनं] MV$A_1B_1L_1$; ◦दिवं $K_1$ **12** ◦संयोग◦] MV$B_1K_1L_1$; ◦सेयोग◦ $A_1$ **13** ◦रूपमात्रेण नित्यापि] MV$A_1B_1L_1$; ++++++++ $K_1$ **13** ◦त्सर्गेण] MV$B_1K_1L_1$; ◦त्सगेण $A_1$ **13** ◦हारेण] $L_1$; ◦हारेण वा MV$A_1B_1K_1$ **13** विषयेणानुरज्यते] MV$B_1$; विषयेनारज्यते $A_1$; विषयेण रज्यते $K_1$; विषयेनानुरज्यते $L_1$ **14** ◦ले तु जगतः] MV$B_1L_1$; ◦ले तु गतः $A_1$; ◦ले जगतः $K_1$ **14** ◦स्मात्क◦] MV$A_1B_1K_1$; ◦स्मत्क◦ $L_1$

प्रयत्नस्तस्य संकल्पविशेषात्मक एव। तथा चागमः "सत्यकामः सत्यसङ्कल्पः" इति। "कामः" इतीच्छोच्यते, "सङ्कल्पः" इति प्रयत्नः।

[3.9.5 उपसंहारः]

तदेवं नवभ्य आत्मगुणेभ्यः पञ्च ज्ञानसुखेच्छाप्रयत्नधर्माः सन्तीश्वरे। चत्वारस्तु दुःखद्वेषाधर्मसंस्कारा न सन्तीत्यात्मविशेष एवेश्वरः, न द्रव्यान्तरम्। आह च पतञ्जलिः "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" इति। सोऽयमागमादनुमानात्पक्षधर्मतातो वा विशेषलाभ इति स्थितम्।

---

**2** सत्यकामः सत्यसङ्कल्पः ] *Chāndogyopaniṣad* 8.1.5
**7** क्लेशकर्म° ··· ईश्वरः ] *Yogasūtra* 1.24

---

**2** °सङ्कल्पः" इति ] MVB$_1$K$_1$L$_1$ ; °कल्प इति A$_1$ **2** "कामः" इतीच्छोच्यते ] MVA$_1$B$_1$L$_1$ ; काम इच्छा K$_1$ **3** इति प्र° ] MVA$_1$B$_1$L$_1$ ; प्र° K$_1$ **7** क्लेशक° ] MVA$_1$B$_1$L$_1$ ; क्लेशध° K$_1$ **9** °क्षधर्मतातो ] B$_1$K$_1$ ; °क्षधर्मतो MVA$_1$L$_1$

### [3.10 ईश्वरशरीरविचारः]

यत्पुनर्विकल्पितम्—सशरीर ईश्वरः सृजति जगदशरीरो वा—इति। तत्राशरीरस्यैव स्रष्टृत्वमस्याभ्युपगच्छामः।

ननु क्रियावेशनिबन्धनं कर्तृत्वं न पारिभाषिकम्। तदशरीरस्य क्रियाविरहात्कथं भवेत्। कस्य च कुत्राशरीरस्य कर्तृत्वं दृष्टमिति। उच्यते। ज्ञानचिकीर्षाप्रयत्नयोगित्वं कर्तृत्वमाचक्षते। तच्चेश्वरे विद्यत एवेत्युक्तमेतत्। स्वशरीरप्रेरणे च दृष्टमशरीरस्याप्यात्मनः कर्तृत्वम्।

### [3.11 ईश्वरस्याव्यापारवत्त्वम्]

इच्छामात्रेण च तस्य कर्तृत्वादनेकव्यापारनिर्वर्तनोपात्तदुर्वहक्लेशकालुष्यविकल्पो ऽपि प्रत्युक्तः। नन्वत्रोक्तम्—

कुलालवच्च नैतस्य व्यापारो यदि कल्प्यते।
अचेतनः कथं भावस्तदिच्छामनुवर्तते॥ इति।

अस्माभिरप्युक्तमेव—

यथा ह्यचेतनः काय आत्मेच्छामनुवर्तते।
तदिच्छामनुवर्त्स्यन्ते तथैव परमाणवः॥

---

**2** यत्पुनर्विकल्पितम् ] See section 2.2.2.4.
**7** स्वशरीरप्रेरणे ··· कर्तृत्वम् ] Cf. *Ślokavārttika ātman*, v. 82: यथा वा देवदत्तस्य च्छेदने काष्ठसंश्रिते। कर्तृत्वमेवं पुंसः स्याच्छरीरगमनादिषु॥
**9** इच्छामात्रेण ] See section 2.2.2.5.
**11** कुलालवच्च ··· ॰मनुवर्तते ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 81

---

**2** ॰र ईश्वरः ] $MVA_1B_1L_1$ ; ॰रस् $K_1$ **2** जगद॰ ] $MVA_1B_1L_1$ ; जगदीश्वर अ॰ $K_1$ **3** ॰त्वमस्या॰ ] $VA_1B_1K_1L_1$ ; ॰त्वम॰ M **6** ॰योगित्वं ] $MVB_1K_1L_1$ ; ॰योगित्व॰ $A_1$ **6** तच्चेश्वरे ] $MVB_1K_1L_1$ ; तच्चश्वरे $A_1$ **7** ॰स्याप्यात्मनः कर्तृत्वम् ] $MVA_1B_1L_1$ ; ॰स्यापि कर्तृत्वमात्मन $K_1$ **9** तस्य ] $MVA_1B_1L_1$ ; कुतस्य $K_1$ **9** ॰दुर्वह॰ ] $MVB_1K_1L_1$ ; ॰दुर्वल॰ $A_1$ **10** प्रत्युक्तः ] $MVB_1L_1$ ; प्रयुक्तः $A_1K_1$ **11** कल्प्यते ] $MVA_1B_1K_1$ ; विकल्प्यते $L_1$(unmetrical) **14** काय ] $MVB_1K_1L_1$ ; om. $A_1$ **15** ॰वर्त्स्यन्ते ] $MVB_1L_1^{pc}$ ; ॰वत्स्यंते $A_1$ ; ॰वत्स्यन्ति $K_1$ ; ॰वर्त्स्यते $L_1^{ac}$(unmetrical)

## [3.12 सृष्टिप्रयोजनम्]

यस्तु प्रयोजनविकल्पः—किमर्थं सृजति जगन्ति भगवान्—इति, सो ऽपि न पेशलः। स्वभाव एवैष भगवतः, यत्कदाचित्सृजति कदाचिच्च संहरति विश्वमिति।

कथं पुनर्नियतकाल एषो ऽस्य स्वभाव इति चेत्। आदित्यं पश्यतु देवानांप्रियः, यो नियतकालमुदेत्यस्तमेति च। प्राणिकर्मसापेक्षमेतद्विवस्वतो रूपमिति चेत्। ईश्वरे ऽपि तुल्यः समाधिः।

## [3.13 क्रीडार्थित्वम्]

क्रीडार्थे ऽपि जगत्सर्गे न हीयेत कृतार्थता।
प्रवर्तमाना दृश्यन्ते न हि क्रीडासु दुःखिताः॥

## [3.14 ईश्वरस्य कारुणिकत्वम्]

अथवानुकम्पयैव सर्गसंहारावारभतामीश्वरः।

नन्वत्र चोदितम्—न तथाविधाः प्राणिनो ऽनुकम्प्या भवन्ति। केवलसुखस्वभावा सृष्टिरनुकम्पावता क्रियेत—इति।

सत्यं चोदितमनुपपन्नं तु, अनादित्वात्संसारस्य। शुभाशुभसंस्कारानुविद्धा एवात्मानः। ते च धर्माधर्मनिगडसंयतत्वादपवर्गपु-

---

**2 यस्तु प्रयोजनविकल्पः** ] See section 2.2.2.6.
**9 क्रीडार्थे** ] See section 2.2.2.9.
**12 अथवानुकम्पयैव** ] See section 2.2.2.7.
**13 चोदितम्** ] See the first verse of section 2.2.2.7.

---

**4 कदाचिच्च** ] $MVA_1B_1L_1$ ; कदाचित् $K_1$ **4 विश्वमिति** ] $MVA_1B_1L_1$ ; विश्वामिति $K_1$ **6 °प्रियः, यो** ] $MVA_1B_1L_1$ ; °प्रियो $K_1$ **6 °काल°** ] $MVA_1B_1L_1$ ; °काला° $K_1$ **12 °कम्पयैव** ] $MVA_1^{pc}B_1K_1L_1$ ; °कथंम्पयैव $A_1^{ac}$ **13 न तथाविधाः ⋯ चोदितम्** ] $MA_1B_1K_1L_1$ ; om. V(eyeskip) **13 प्राणिनो ऽनु°** ] $MA_1B_1K_1$ ; प्राणिनोरनु° $L_1$ **14 °स्वभावा** ] $A_1B_1K_1L_1$ ; °स्वभावा वा M **14 °कम्पावता** ] $MA_1B_1L_1$ ; °कम्पया $K_1$ **14 क्रियेत—इति** ] $MB_1K_1$ ; क्रियेतति $A_1$ ; क्रिये इति $L_1$ **16 °संयत°** ] $MA_1B_1K_1L_1$ ; °संवृत° V

रद्वारप्रवेशमलभमानाः कथं नानुकम्प्याः। अनुपभुक्तफलानां कर्मणां न प्रक्षयः। सर्गमन्तरेण च तत्फलोपभोगासंभव इति शुभफलोपभोगाय स्वर्गादिसर्गमशुभफलोपभोगाय नरकादिसृष्टिमारभते दयालुरेव भगवान्। उपभोगप्रबन्धपरिश्रान्तानामन्तरान्तरा विश्रान्तये जन्तूनां भुवनोपसंहारमपि करोतीति सर्वमेतत्कृपानिबन्धनमेव।

[3.15 कर्मविचारः]

ननु च युगपदेव सकलजगत्प्रलयकरणमनुपपन्नम्, अविनाशिनां कर्मणां फलोपभोगप्रतिबन्धासंभवात्—इति चोदितम्। न युक्तमेतत्, ईश्वरेच्छाप्रतिबद्धानां कर्मणां स्तिमितशक्तीनामवस्थानात्। तदिच्छाप्रेरितानि कर्माणि फलमादधति, तदिच्छाप्रतिबद्धानि च तत्रोदासते। कस्मादेवमिति चेत्। अचेतनानां चेतनानधिष्ठितानां स्वकार्यकरणानुपलब्धेः।

---

8 चोदितम् ] See the first verse of section 2.2.2.10.

---

1 °वेशमलभ° ] $MVA_1B_1L_1$; °वेशलभ° $K_1$ 1 °भुक्त° ] $MVB_1K_1L_1$; °भक्त° $A_1$ 2 प्रक्षयः ] $MVB_1L_1$; प्रत्यक्षयः $A_1$(marked); प्रक्षय $K_1$ 2 तत्फलोपभोगा° … °भोगाय नर° ] $MB_1L_1$; तत्फलभोगाय नर° V; तत्फलोपभोगभोगा° … °भोगाय नर° $A_1$; तत्फलोपभोगा° … भोगाय च नर° $K_1$ 2 शुभ° ] $MA_1B_1L_1$; शुभकर्म° $K_1$ 3 °मशुभ° ] $MA_1B_1L_1$; °कर्ममशुभ° $K_1$ 4 °प्रबन्ध° ] $A_1B_1K_1L_1$; °प्रबन्धेन MV 4 °नामन्तरा° ] $MVA_1B_1L_1$; °नामनन्तरा° $K_1$ 4 विश्रान्तये ] $MVB_1K_1L_1$; विश्रंतये $A_1$ 5 जन्तूनां ] $MVB_1K_1L_1$; जतूनां $A_1$ 7 ननु च ] $MVA_1B_1L_1$; ननु च न $K_1$ 7 °करणमनु° ] $MVB_1L_1$; °करमनु° $A_1$; °करणम° $K_1$ 9 °प्रतिबद्धा° ] $MVA_1^{pc}B_1K_1L_1$; °प्रतिकवद्धा° $A_1^{ac}$ 9 °स्थानात् ] $MVB_1K_1L_1$; °स्थानाम् $A_1$ 10 °दधति ] $MVB_1K_1$; °दधेति $A_1$; °दधाति $L_1$ 11 अचेतनानां ] $MVB_1K_1L_1$; अचेतनां $A_1$ 11 चेतनानधि° ] $MVK_1$; चेतनाधि° $A_1B_1L_1$

## [3.16 कर्माधिष्ठाता]

ननु तेषामेव कर्मणां कर्तार आत्मानश्चेतना अधिष्ठातारो भविष्यन्ति। यथाह भट्टः—

कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम्॥ इति।

नैतदेवम्। नैते ऽधिष्ठातारो भवितुमर्हन्ति, बहुत्वात्, विरुद्धाभिप्रायत्वाच्च। तथा ह्येक एव कश्चित्स्थावरादिविशेषो राजादिविशेषो वा प्राणिकोटीनामनेकविधसुखदुःखोपभोगस्य हेतुः स तैर्बहुभिरव्य-

---

**2** ननु ] See section 2.2.2.8.

**2** ननु ··· भविष्यन्ति ] *Āgamaḍambara* 174.7–8: ननु चेतनास्तेषामेव कर्मणां कर्तारो ऽधिष्ठातारो भविष्यन्ति।

**4** कर्मभिः सर्व° ··· सिद्धसाधनम् ] *Ślokavārttika saṃbandhākṣepaparihāra*, v. 75: कस्यचिद्धेतुमात्रत्वं यद्यधिष्ठातृतेष्यते। कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम्॥ (सर्वजीवानां is supported by Sucarita's (Adyar ms. No. 38G5 = TR66.6) and Pārthasārathi's commentaries); but cf. *Nyāyamañjarīgranthibhaṅga* 83.22–23: कर्मभिः सर्वबीजानामित्यस्य पूर्वमर्धम् "कस्यचिद्धेतुमात्रस्य यद्यधिष्ठातृतोच्यते" इति। कर्मभिस्तत्सिद्धेरधिष्ठातृत्वसिद्धेः। बीजकार्यत्वाद् बीजशब्देन कार्यमत्रोच्यते, उपभोगसाधनत्वाद्वा कार्यं बीजमुक्तम्, कर्मद्वारेण चात्मेच्छापूर्वकत्वात् सर्वकर्मणामात्मेच्छाधिष्ठातृत्वसिद्धिर्विवक्षिता।

**6** विरुद्धाभिप्रायत्वाच्च ] *Āgamaḍambara* 174.9–10: न भवितुमर्हन्ति, भिन्नाभिप्रायाणां सम्मानानुपपत्तेः।

---

**2** कर्मणां ] MV$B_1K_1$; कर्माणां $A_1L_1$ **2** आत्मान° ] MV$A_1B_1L_1$; अ° $K_1$ **2** °ष्ठातारो ] MV$A_1^{pc}B_1K_1L_1$; °ष्ठामातारो $A_1^{ac}$ **4** सर्व° ] MV$A_1B_1K_1L_1^{pc}$; सर्वकर्म° $L_1^{ac}$ **4** जीवानां ] MV$B_1$; बीजानां $A_1K_1L_1$ **4** तत्सिद्धेः ] MV$B_1K_1L_1$; तत्सिद्धिः $A_1$ **5** भवितुम° ] MV$B_1K_1L_1$; भविष्यम° $A_1$ **5** °र्हन्ति ] MV$A_1B_1L_1$; °र्हति $K_1$ **5** बहुत्वात्, वि° ] MV$B_1K_1L_1$; वहुत्वावि° $A_1$ **6** °भिप्राय° ] MV$A_1B_1^{pc}K_1L_1$; °भिय° $B_1^{ac}$ **6** राजादिविशेषो ] MV$B_1$; राजाविशेषो $A_1$; राजादिशरीरविशेषो $K_1$; राजादिविशेषं $L_1^{ac}$; राजादिविशेषे $L_1^{pc}$ **7** °विध° ] MV$A_1B_1L_1$; °विधस्य $K_1$

वस्थिताभिप्रायैः कथमारभेत, तेषामेकत्र संमानाभावात्। मठपरिषदो ऽपि क्वचिदेव सकलसाधारणोपकारिणि कार्ये भवत्यैकमत्यम्, न सर्वत्र। महाप्रासादाद्यारम्भे बहूनां तक्षादीनामेकस्थपत्याशयानुवर्तित्वं दृश्यते। पिपीलकानामपि मृत्कूटकरणे तुल्यः कश्चिदुपकारः प्रवर्तकः। स्थपतिवदेकाशयानुवर्तित्वं वा कल्प्यम्। इह तु तत्स्थावरं शरीरं केषाञ्चिदुपकारकारणम्, इतरेषामपि भूयसामपकारकारणमिति कथं तैः संभूय सृज्येत। अनधिष्ठितानां त्वचेतनानामारम्भकत्वमयुक्तमेव। तस्मादवश्यमेकस्तेषां कर्मणामधिष्ठाता कल्पनीयः, यदिच्छामन्तरेण भवन्त्यपि कर्माणि न फलजन्मने प्रभवन्ति।

---

**2** मठपरिषदो ··· न सर्वत्र ] *Āgamaḍambara* 174.15–17: ॥ वृद्धा ॥ कथं तर्हि परिषदि द्विजानां सम्मानम्। ॥ भट्टा ॥ तत्रापि कार्यकोविदस्य परिषत्पतेरेकस्याशयमनुरुध्यते परिषत्।

**2** मठपरिषदो ] But cf. *Nyāyamañjarīgranthibhaṅga* 83.27: मठपर्षदो ऽपीत्यादिना।

**3** महाप्रासादा° ··· दृश्यन्ते ] *Āgamaḍambara* 174.13–14: ॥ वृद्धा ॥ ननु ते बहवो ऽप्येकं मन्दिरमारभन्ते। ॥ भट्टा ॥ मैवम्, एकस्य स्थपतेराशयानुवर्तिनस्ते।

**8** तस्मादवश्यमे° ··· प्रभवन्ति ] *Āgamaḍambara* 174.22–23: इतीश्वर एव भगवांस्तस्य तावतः कर्मराशेरधिष्ठाता नूनमेषितव्यः।

---

**1** °व्यवस्थिता° ] $MVA_1B_1K_1$; °व्यवस्था° $L_1$ **1** °रभेत ] $ML_1$; °रभ्येत $VK_1$; °रभेद $A_1$; °रभते $B_1$ **1** संमाना° ] $MVA_1K_1$; संगीत्य° $B_1$; सङ्गाना° $M^{back}L_1$ **1** मठ° ] $MA_1B_1K_1L_1$; शठ° V **2** °परिषदो ऽपि ] $MVA_1B_1L_1$; °परिषदोदावपि $K_1$ **2** कार्ये ] $MVB_1K_1L_1$; कार्यै $A_1$ **2** °त्यैकमत्यम् ] $MVB_1L_1$; °त्यैकसत्यम् $A_1$; °त्येकमत्यम् $K_1$ **4** °वर्ति° ] $MVA_1B_1L_1$; °वृत्ति° $K_1$ **4** पिपीलका° ] $A_1^{pc}B_1L_1$; पिपीलिका° $MVK_1$; पीपीलका° $A_1^{ac}$ **5** °वर्तित्वं ] $MVA_1B_1L_1$; °वर्त्तनं $K_1$ **5** तत्स्था° ] $MVA_1B_1L_1$; स्था° $K_1$ **6** शरीरं ] $MVA_1B_1L_1$; शरीरं वा $K_1$ **6** °षामपि ] $MVA_1B_1L_1$; °षां $K_1$ **7** सृज्येत ] $A_1K_1L_1$; सृज्यते $MVB_1$ **7** °चेतनानामा° ] $MVB_1K_1$; °चैतनानामा° $A_1$; °चेतनामा° $L_1$ **8** कर्मणाम° ] $MVB_1K_1$; कर्माणाम° $A_1L_1$ **8** °धिष्ठाता ] $MVA_1B_1K_1L_1^{pc}$; °धिष्ठिता $L_1^{ac}$ **9** न फल° ] $MVA_1B_1L_1$; नग्गं फल° $K_1$

अत एवैक ईश्वर इष्यते, न द्वौ बहवो वा, भिन्नाभिप्रायतया लोकानुग्रहोपघातवैशसप्रसङ्गात्, इच्छाविसंवादसंभवेन च ततः कस्यचित्सङ्कल्पविघातद्वारकानैश्वर्यप्रसङ्गात्—इत्येक एवेश्वरः। तदिच्छया कर्माणि कार्येषु प्रवर्तन्ते—इत्युपपन्नः सर्गः। तदिच्छाप्रतिबन्धात्स्तिमितशक्तीनि कर्माण्युदासते—इत्युपपन्नः प्रलयः।

### [3.17 सर्गप्रलयकल्पनोपपन्ना]

एवञ्च यदुक्तम्—

तस्मादद्यवदेवात्र सर्गप्रलयकल्पना।
समस्तक्षयजन्मभ्यां न सिद्ध्यत्यप्रमाणिका॥

इति, एतदप्यसांप्रतम्।

तिष्ठतु वा सर्गप्रलयकालः। अद्यत्वे ऽपि यथोक्तनयेन तदिच्छा-

---

1 अत एवैक ··· इत्येक एवेश्वरः ] *Nyāyamañjarī* I 587.17–588.10: जगत्सर्गे तावदेक एवेश्वर इष्यते, न द्वौ बहवो वा। भिन्नाभिन्नाशयकल्पने—एकत्र वैयर्थ्यात्, इतरत्र व्यवहारवैशसप्रसङ्गेन तत एकस्येश्वरत्वविघातात्। तथा हि—अनेकेश्वरवादो हि नातीव हृदयङ्गमः। ते चेत्सदृशसंकल्पाः को ऽर्थो बहुभिरीश्वरैः॥ संकल्पयति यदेकः शुभमशुभं वापि सत्यसंकल्पः। तत्सिध्यति तद्विभवादित्यपरस्तत्र किं कुर्यात्॥ भिन्नाभिप्रायतायां तु कार्यविप्रतिषेधतः। नूनमेकः स्वसंकल्पविहत्यानीश्वरो भवेत्॥ एकस्य किल संकल्पः “राजायं क्रियताम्” इति। “हन्यताम्” इति चान्यस्य तौ समाविशतः कथम्॥ राज्यसंकल्पसाफल्ये विहता वधकामना। तस्याः सफलतायां वा राज्यसंकल्पविप्लवः॥ तेन चित्रजगत्कार्यसंवाहानुगुणाशयः। एक एवेश्वरः स्रष्टा जगतामिति साधितम्॥
**7 यदुक्तम्** ] See section 2.8.

---

**1** इष्यते, न ] $MVB_1K_1L_1$; इष्यतेत न $A_1$ **2** °वैशस° ] $MVA_1B_1L_1$; °वैश° $K_1$ **4** तदिच्छया ] $MVA_1B_1K_1L_1^{pc}$; तदिच्छवया $L_1^{ac}$ **5** °बन्धात्स्ति° ] $MVA_1B_1L_1$; °बन्धादिस्ति° $K_1$ **5** °ण्युदास° ] $MVA_1B_1L_1$; °ण्यास° $K_1$ **5** °न्नः प्रलयः ] $MVB_1K_1L_1^{pc}$; °न्नप्रलयः $A_1$; °न्नः सर्गप्रलयः $L_1^{ac}$ **9** °जन्मभ्यां ] $MVB_1K_1L_1$; °जन्माभ्यां $A_1$ **10** °दप्यसां° ] $MA_1B_1K_1L_1^{pc}$; °दपि न सां° $M^{ka}V$; °दसां° $L_1^{ac}$ **11** °नयेन ] $MVA_1K_1L_1$; °नयनेन $B_1$

मन्तरेण प्राणिनां कर्मविपाकानुपपत्तेरवश्यमीश्वरो ऽभ्युपगन्तव्यः, इतरथा सर्वव्यवहारविप्रलोपः। तदुक्तम्—

अज्ञो जन्तुरनीशो ऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा॥ इति।

## [3.18 कर्मावश्यकता]

नन्वेवं तर्हीश्वरेच्छैव भवतु कर्त्री संहर्त्री च, किं कर्मभिः। मैवम्। कर्मभिर्विना जगद्वैचित्र्यानुपपत्तेः। कर्मनैरपेक्ष्यपक्षे ऽपि त्रयो दोषा दर्शिता एव— ईश्वरस्य निर्दयत्वं कर्मचोदनानर्थक्यमनिर्मोक्षप्रसङ्गश्चेति। तस्मात्कर्मणामेव नियोजने स्वातन्त्र्यमीश्वरस्य, न तन्निरपेक्षम्।

## [3.19 ऐश्वर्यहान्यभावः]

किं तादृशेनैश्वर्येण प्रयोजनमिति चेत्। न। न प्रयोजनानुवर्ति प्रमाणं भवितुमर्हति। किं वा भगवतः कर्मापेक्षिणो ऽपि न प्रभुत्वमित्यलं

---

**3** अज्ञो ··· °मेव वा ] =*Āgamaḍambara* 178.1–2; *Mahābhārata* 3.31.27: अज्ञो जन्तुरनीशो ऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव च॥ *Mahābhārata* 12 Appendix I, No. 1 ll. 25–26: अज्ञो जन्तुरनीशश्च भाजनं सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा॥
**6** नन्वेवं ··· किं कर्मभिः ] See the third verse of section 2.2.2.10.
**12** किं ··· चेत् ] See section 2.2.2.8.

---

**1** प्राणिनां ] MV$B_1K_1L_1$; प्राणिना $A_1$ **2** °तरथा सर्वव्यवहार° ] MV$B_1L_1$; °तरथा सर्वव्यवहारः $A_1$; +++++++++ $K_1$ **4** श्वभ्र° ] MV$K_1L_1^{ac}$; शुभ्र° $A_1B_1L_1^{pc}$ **7** °द्वैचित्र्यानुपपत्तेः। कर्म° ] MV$B_1L_1$; °द्वेचित्र्यानुपपत्तेः कर्म° $A_1$; °द्वैचित्र्या++++++ $K_1$ **7** °पक्षे ऽपि ] MV$B_1L_1$; °पक्ष्ये पि $A_1$; °पक्षे च $K_1$ **8** निर्दयत्वं ] M$A_1B_1K_1L_1$; निर्दय° V **12** तादृशेनैश्व° ] $A_1B_1K_1L_1$; तादृशैश्व° MV **12** °र्येण ] MV$A_1B_1L_1$; °र्येणास्य $K_1$ **12** न। न ] MV$L_1$; न $A_1B_1K_1$ **13** किं वा ] MV$A_1B_1L_1$; किं $K_1$ **13** न ] MV$A_1B_1L_1$; ना° $K_1$

कुतर्कलवलिप्तमुखनास्तिकालापपरिमर्दनेन।

[3.20 उपसंहारः]

तस्मात्कुतार्किकोद्गीतदूषणाभासवारणात्।
सिद्धस्त्रैलोक्यनिर्माणनिपुणः परमेश्वरः॥
ये त्वीश्वरं निरपवाददृढप्रमाण-
सिद्धस्वरूपमपि नाभ्युपयन्ति मूढाः।
पापाय तैः सह कथापि वितन्यमाना
जायेत नूनमिति युक्तमतो विरन्तुम्॥
यस्येच्छयैव भुवनानि समुद्भवन्ति
तिष्ठन्ति यान्ति च पुनर्विलयं युगान्ते।
तस्मै समस्तफलभोगनिबन्धनाय
नित्यप्रबुद्धमुदिताय नमः शिवाय॥

---

**1** कुतर्कलव° ] MV$B_1K_1L_1$ ; कुतः केवल° $A_1^{ac}$ ; कुतः केलव° $A_1^{pc}$ **1** °लि-प्त° ] MV$A_1B_1K_1L_1^{pc}$ ; °विलिप्त° $L_1^{ac}$ **1** °परिमर्दनेन ] MV$A_1B_1L_1$ ; °वि-मर्शेन $K_1$ **4** सिद्धस्त्रै° ] MV$B_1K_1L_1$ ; सिद्धेः त्रै° $A_1$ **6** °स्वरूप° ] MV$A_1B_1L_1$ ; °रूप° $K_1$(unmetrical) **6** मूढाः ] MV$B_1K_1L_1$ ; मूढः $A_1$ **7** तैः सह ] MV$A_1B_1K_1$ ; तै सह $L_1$ **9** समुद्भवन्ति ] MV$B_1K_1L_1$ ; समुद्भवनि $A_1$ **10** यान्ति च ] MV$B_1L_1$ ; यां च $A_1$ ; यान्त्यपि $K_1$